# Hasyashikarashatakam

# હાસ્યશીકરશતકમ્

## Document Information

Text title : Hasyashikarashatakam

File name : hAsyashIkarashatakam.itx

Category : misc, sahitya

Location : doc_z_misc_general

Author : G.S.S. Murthy murthygss at gmail dot com

Transliterated by : G.S.S. Murthy

Proofread by : G.S.S. Murthy

Latest update : July 7, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskcript**.

July 7, 2024

*sanskritdocuments.org*

Hasyashikarashatakam

# હાસ્યશીકરશતકમ્

સઙ્કલનકર્તા - જિ. એસ્. શ્રીનિવાસમૂર્તિઃ

## ભૂમિકા

આધુનિકકાલે આઙ્ગ્લભાષાયાં હાસ્યરસોદ્દીપકઃ યઃ મિતવાક્યગ્રથિતઃ પ્રબન્ધઃ “જોક્” ઇતિ કથ્યતે, તસ્ય પરિચયઃ સંસ્કૃતભાષાયાં અસ્યાં પુસ્તિકાયાં ક્રિયતે । શતં હાસ્યશીકરાઃ અસ્યાં પુસ્તિકાયાં પ્રકાશ્યન્તે ।

નવરસેષુ હાસ્યરસઃ પરિગણિતોઽપિ સંસ્કૃતસાહિત્યે શિષ્ટજનાસ્વાદનયોગ્યહાસ્યરસજનકાઃ રચનાઃ વિરલા એવ । નાટકાઙ્ગભૂતવિદૂષકપાત્રમુખેન તથા રૂપકાઙ્ગભૂતપ્રહસનેષુ ચ યત્ હાસ્યમિતિ પ્રયુજ્યતે તત્ બહુશઃ અશ્લીલતાસીમાનં ગ્રામ્યતાં ચ પ્રાપ્નોતિ । પદ્ય-ગદ્ય-ચમ્પૂકૃતિષુ હાસ્યરસઃ ન દૃશ્યતે એવ ઇતિ કથયામઃ યદિ તત્ સત્યદૂરં ન ભવતિ ।

વૈદ્યા અપિ હાસ્યશીલતા આયુર્વૃદ્ધ્યૈ સ્વાસ્થ્યક્ષેમાય ચ ઇત્યામનન્તિ । કિઞ્ચ, સંસ્કૃતકૃતિરચયિતારઃ સંસ્કૃતયોગક્ષેમાય નૂતનવિધાઃ અન્યભાષાસાહિત્યશાખાપ્રચોદિતાઃ કૃતીઃ રચયેયુઃ ઇતિ સર્વે સંસ્કૃતવિદ્વાંસઃ સંસ્કૃતપ્રેમિણઃ અભિલષન્તિ । તદભિલાષપૂરણે હાસ્યશીલતાવૃદ્ધ્યૈ ચ ઇયં રચના કિઞ્ચિત્કરી ચેત્ અયં લેખકઃ કૃતાર્થઃ નૂનમ્ ।

ઇમે શિષ્ટજનપઠનયોગ્યાઃ હાસ્યશીકરાઃ આઙ્ગ્લભાષાયામ્ અન્યભાષાસુ ચ બહુશઃ પ્રચલિતા, “બ્લાગ્”રૂપેણ સંસ્કૃતે હ્ત્ત્પ્://સિમ્પ્લેસન્સ્કૃત્।બ્લોગ્સ્પોત્ૅઓમ્/ જાલપુટે અનૂદ્ય લેખકેન પ્રકાશિતાઃ એવ । અતઃ કેષાઞ્ચિત્ પાઠકાનામત્ર નવ્યતા ન દ્યોતયેત । તથાપિ સંસ્કૃતસમૃદ્ધ્યર્થં કૃતામ્ ઇમાં કૃતિં સર્વે પઠન્તુ, પઠિત્વા હસન્તુ, મોદન્તામિતિ સપ્રશ્રયમાશાસ્તે લેખકઃ ।

ઇતિ શમ્,<br>
જિ।એસ્।શ્રીનિવાસમૂર્તિઃ<br>
બેઙ્ગલૂરુ-૭૮

## હાસ્યશીકરશતકમ્

## ૧. બાલચેષ્ટા-૧

રજન્યાં કાર્યનિરતા માતા બાલં સુતમવદત્, “વત્સ, ગૃહપૃષ્ઠે સંમાર્જની કોણે વર્તતે તામાનય” ઇતિ। બાલઃ પ્રત્યવદત્, “અહં ન ગચ્છામિ । બહિઃ ગાઢઃ અન્ધકારઃ” ઇતિ । માતા પ્રત્યવદત્, “મા ભૈષીઃ, ઈશ્વરઃ સર્વદા સર્વત્ર તવ રક્ષકઃ ભવતિ । ભયં પરિત્યજ્ય ગચ્છ” ઇતિ । ભીતઃ બાલઃ પુનરવદત્, “અમ્બ, ઈશ્વરઃ અધુના ગૃહપૃષ્ઠેઽપિ વર્તતે કિમ્।” માતા અવદત્ “નિસ્સંશયં વત્સ” ઇતિ । બાલઃ, “બાઢં ગચ્છામિ” ઇતિ વદન્ ગૃહપૃષ્ઠદ્વારપર્યન્તમગચ્છત્ । તત્ર સ્થિત્વા કવાટમીષદુદ્ઘાટ્ય અવદત્, “ઈશ્વર, કૃપયા કોણે સ્થિતાં સંમાર્જનીં મહ્યં દેહિ” ઇતિ ।

## ૨. શ્વશ્રૂઃ-સ્નુષા-૧

સાયં યદા પુરુષઃ કાર્યાલયાત્ ગૃહમાગતઃ તદા તસ્ય ભાર્યા અશ્રુપૂર્ણનયના આસીત્ । પુરુષઃ ચકિતઃ ખિન્નશ્ચ તામપૃચ્છત્, “કિમિદમ્? કિં પ્રવૃત્તમ્?” । ભાર્યા અવદત્, “અદ્ય તવ જનન્યા પરિભૂતાઽસ્મિ” । સઃ અવદત્, “કથમિવ વા ભવેત્? સા અન્યનગરે વર્તતે ખલુ?” । સા પ્રત્યવદત્, પ્રાતઃ તસ્યાઃ સકાશાત્ તુભ્યં પત્રમેકં સમાગતમ્ । તત્ કુતૂહલાવિષ્ટા પિધાનમપાવૃત્ય અપઠમ્ । તત્ર અન્તે તયા લિખિતમ્, “પ્રિયે સ્નુષે, કૃપયા એતત્ પત્રં મમ પુત્રાય દેહિ” ઇતિ ।

## ૩. મદ્યપાનમ્-૧

પાનલોલઃ પિતા તરુણં પુત્રમાત્મના સહ પાનાગારમનયત્ । પુત્રસ્ય ઇદમેવ પ્રથમપાનમાસીત્ । ઉભૌ પાતું પ્રારભેતામ્ । પુત્રઃ પ્રારમ્ભ એવ પિતરમવદત્, “તાત, કથય કદા અહં પાનાત્ વિરમૈ ।” કતિપયચષકાનાપીય પિતા પુત્રં સ્ખલિતવાચાવદત્, “પુત્ર, પશ્ય તત્ર દ્વૌ દીપૌ દૃશ્યેતે । યદા ચત્વારઃ દૃશ્યન્તે તદા પાનાત્ વિરમસ્વ।” પુત્રઃ ચકિતઃ પ્રત્યવદત્, “તાત, તત્ર એક એવ દીપઃ દૃશ્યતે ખલુ” ।

## ૪. મતિવિભ્રમઃ-૧

મનોવૈદ્યાલયે કશ્ચન રુગ્ણઃ પાર્શ્વપર્યઙ્કે નિષીદન્તમન્યં રુગ્ણમબ્રવીત્, “ભોઃ, વયસ્ય, ઈશ્વરેણ અહં જગતઃ સાર્વભૌમઃ નિયુક્તોઽસ્મિ” । “યદ્વદસિ તત્ મૃષા ખલુ । મયા ત્વં ન નિયુક્તોઽસિ” ઇતિ પ્રત્યવદદન્યઃ ।

## ૫. મૌઢ્યમ્-૧

દેવદત્તઃ એકદા જટકાખ્યતુરગશકટિકાયાં ગચ્છતિ સ્મ । માર્ગે દેવદત્તઃ શકટિકાચાલકં પપ્રચ્છ, “ભોઃ, નગર્યાં કા વાર્તા?” । કિઞ્ચિચ્ચકિતઃ ચાલકઃ અવદત્, “આર્ય, ન કાચિદપિ વાર્તા શ્રુતા મયા । પરં તુ મમ વયસ્યઃ કૂટમેકં દદૌ । તદિત્થં, “મમ પિતુઃ પુત્રઃ વર્તતે યઃ મમ અગ્રજોઽપિ ન અનુજોઽપિ ન ભવતિ । સઃ કઃ? આર્યઃ કથયિતુમર્હતિ । “દેવદત્તઃ ચિરમચિન્તયત્ તથાપિ ઉત્તરં દાતું ન શશાક । પરાભૂતઃ અવદત્, “ન જાને । સઃ કઃ? કથય” ઇતિ । ઉચ્ચૈર્વિહસ્ય ચાલકઃ અવદત્, “આર્ય, અહમેવ” । દેવદત્તોઽપિ ઉચ્ચૈર્જહાસ, “રુચિરં ખલુ તવ કૂટમ્ । તવ નામ

કિમ્?" ચાલકઃ અવદત્, "મમ નામ મોહમ્મદ્ ઉસ્માન્" । "બાઢં, ત્વં કુત્ર વસસિ?" । "મુસ્લિમ્ મોહલ્લાયાઃ પ્રથમ વીથ્યામ્" । દેવદત્તઃ કૃચ્છ્રેણ ચાલકસ્ય નામધામવિશેષાન્ કણ્ઠસ્થમકરોત્ ।
અથ કદાચિત્ સઃ તસ્ય વયસ્યેન નરદત્તેન સમમિલત્ । કુશલપ્રશ્નાનન્તરં નરદત્તં પપ્રચ્છ, "મિત્ર, અહં કૂટમેકં વદામિ । ઉત્તરં કથયસિ કિમ્?" ઇતિ ।
નરદત્તઃ પ્રત્યવદત્, "અથ કિમ્, ઉત્તરં દાતું યતે । કથય । "દેવદત્તઃ અકથયત્, "મમ પિતુઃ પુત્રઃ એકઃ વર્તતે । સઃ મમ અગ્રજોઽપિ ન, મમ અનુજોઽપિ ન । સઃ કઃ ¿'નરદત્તઃ ચિરં વિચિન્ત્ય અવદત્, "ક્ષમસ્વ, ઉત્તરં ન મે ભાતિ "ઇતિ । દેવદત્તઃ ઉચ્ચૈઃ વિહસ્ય અવદત્, "સરલં ખલુ કૂટમ્ । સઃ મોહમ્મદ્ ઉસ્માન્ યઃ મુસ્લિમ્ મોહલ્લાયાઃ પ્રથમવીથ્યાં વસતિ" ઇતિ । નરદત્તશ્ચ ઉચ્ચૈર્જહાસ ઉસ્માન્ વર્યસ્ય નામધામવિશેષાન્ કણ્ઠસ્થં ચકાર ચ ।

## ૬. દામ્પત્યમ્-૧

દેવદત્તઃ ચિરાય અકૃતોદ્વાહઃ આસીત્ । તસ્ય સર્વે વયસ્યાઃ વિવાહિતા બભૂવુઃ । બહવઃ દેવદત્તમપૃચ્છન્ । "કુતસ્ત્વમકૃતોદ્વાહઃ વર્તસે? કિમ્ કારણમ્ ?" ઇતિ । દેવદત્તસ્ય ઇદમેવ ઉત્તરમાસીત્, "અહં કિં કરવાણિ? યાઃ કન્યાઃ મહ્યં રોચન્તે તાઃ મમ માત્રે ન રોચન્તે"। કશ્ચન વયસ્યઃ નરદત્તનામા દેવદત્તમસૂચયત્, "વયસ્ય કાઞ્ચન ત્વન્માતૃસદૃશીં કન્યાં નિશ્ચિનુ । તદા સા તવ માત્રે રોચતે" । દેવદત્તાય નરદત્તસ્ય સૂચના અરોચત અવદચ્ચ, "બાઢમ્, તથૈવ કરિષ્યામિ" ઇતિ ।
દિનેષુ ગચ્છત્સુ એકદા નરદત્તઃ દેવદત્તેન સહ સમમિલત્ । દેવદત્તમપૃચ્છત્, "મિત્ર, ત્વં કિં વિવાહિતોઽસિ । "નૈવ, મિત્ર" । "કુતઃ? ત્વં મમ સૂચનાં નાઙ્ગીકૃતવાન્ કિમ્?" । "મિત્ર, તવ સૂચનામનુસૃત્ય એવ કૃચ્છ્રેણ મન્માતૃસદૃશીં કન્યામેકાં અવરયમ્ । સા મમ માત્રે ભૃશમરોચત । પરં તુ કિં કથયાનિ?" નરદત્તઃ અવદત્, "કુતઃ પરં તુ? કથય" । દેવદત્તઃ અવદત્, "કન્યા મમ પિત્રે ન અરોચત ખલુ " ।

## ૭. દામ્પત્યમ્-૨

અક્બરમહારાજઃ અમાત્યં બીરબલમવદત્, "સખે, મહારાજોઽપ્યહં ભાર્યાધીનઃ એવ ભવામિ । અતઃ મમ મનઃ દૂયતે । કિં કરવાણિ?" ઇતિ । બીરબલઃ પ્રત્યવદત્, "પ્રભો, અત્ર વિચિત્રં કિમ્? ચિન્તનીયં કિમ્?" ઇતિ । અક્બરઃ અપૃચ્છત્, "કિમ્ ત્વમપિ તવ ભાર્યાધીનઃ?" ઇતિ । બીરબલઃ અબ્રવીત્, "નિસ્સંશયં પ્રભો અહં ભાર્યાધીન એવ । સર્વે ગૃહસ્થાઃ ભાર્યાધીના એવ" ઇતિ । "કથમિત્થં બ્રવીષિ? અહં ભવેયમ્, ત્વં ભવેઃ, તત્કારણાત્ સર્વે ગૃહસ્થાઃ ભાર્યાધીના ઇતિ ન સિદ્ધ્યતિ" ઇતિ । બીરબલઃ અગદત્, "આજ્ઞાપયતુ મહારાજઃ, રાજસભામામન્ત્રયાવ । સભ્યાન્ સર્વાન્ અસ્મિન્ વિષયે પ્રષ્ટુમર્હતિ મહારાજઃ । "અક્બરેન બીરબલસ્ય સૂચના અઙ્ગીકૃતા રાજસભા ચ આમન્ત્રિતા ।
અક્બરઃ કુશલપ્રશ્નાનન્તરં સભ્યાન્ અવદત્, "ભોઃ સભ્યાઃ ઇદાનીં રાજમન્ત્રણાય ઇયં સભા ન આહૂતા । બીરબલઃ વદતિ, "સર્વે ગૃહસ્થાઃ ભાર્યાધીના એવ" ઇતિ । અસ્મિન્ વિષયે મમ સંશયઃ અસ્તિ । અત એવ યૂયમત્ર આહૂતાઃ । યે સભ્યાઃ બીરબલસ્ય વાક્યમનુમોદન્તે તે મમ વામપાર્શ્વે આગત્ય નિષીદન્તુ । યે નાનુમોદન્તે તે મમ દક્ષિણપાર્શ્વે

આગત્ય નિષીદન્તુ "ઇતિ । બહવઃ રાજ્ઞઃ વામપાર્શ્વે એકૈકશઃ આગત્ય ન્યષીદન્ । એક એવ રાજ્ઞઃ વામપાર્શ્વં ન જગામ । અન્તતઃ સઃ શનૈઃ ચલન્ રાજ્ઞઃ દક્ષિણપાર્શ્વમાગત્ય ન્યષીદત્ । વિસ્મિતઃ રાજા તમપૃચ્છત્, "સખે, કિમિદમ્? ત્વમેક એવ બીરબલમતં નાનુમોદસે?" । સઃ મન્દં મન્દમુત્તરમબ્રવીત્, "પ્રભો, એતદ્વિષયે કિમપિ વક્તું ન સમર્થોઽસ્મિ । મયિ નિર્ગચ્છતિ ગૃહાત્ મમ ભાર્યા મામવોચત્, "કદાપિ જનવૃન્દં મા પ્રવિશ" ઇતિ । અત એવ અહં વામપાર્શ્વં નાગચ્છમ્" ઇતિ ।

## ૮. દામ્પત્યમ્-૩

પતિપત્ન્યોઃ વાગ્વાદઃ અભવત્ । કુપિતઃ પતિઃ અવદત્, "ત્વયિ વિધાતા ઇયત્સૌન્દર્યં ઇયન્મૌઢ્યં ચ કુતઃ અયુજત્ ¿'ઇતિ । પત્ની અવદત્, "શ ૃણુ, વિધાતા તથા મામિયતીં સુન્દરીમકરોત્ યથા ત્વં માં વૃણુયાઃ । તથા મામિયતીં મૂઢામકરોત્ યથાહં ત્વાં વૃણુયામ્ "ઇતિ ।

## ૯. સ્ખલિતાભિજ્ઞાનમ્-૧

કદાચન દેવદત્તઃ રાત્ર્યાં બેઙ્ગલૂરુનગરાત્ જાલાર્પેટ્ટૈપુરં ગન્તું બેઙ્ગલૂરુ-ચેન્નૈ રેલ્-યાનમારુરોહ । રેલ્-યાનઃ જાલાર્પેટ્ટૈપુરં રાત્રૌ એકવાદનસમયે ઉપાગચ્છતિ ખલુ । અતઃ સઃ રેલ્-શયનકોષ્ઠ-નિર્વાહકં પ્રાર્થયત્, "અહં કુમ્ભકર્ણવત્ સ્વપિમિ । કૃપયા ભવાન્ માં બલાત્ પ્રબોધ્ય જાલાર્પેટ્ટૈપુરે મમ રેલ્-યાનાત્ અવરોહણે સાહાય્યં કરોતુ " ઇતિ । નિર્વાહકઃ દેવદત્તસ્ય પ્રાર્થનામન્વમન્યત, "તથૈવ કરોમિ" ઇત્યવદચ્ચ ।
યદા પરેદ્યુઃ પ્રાતઃ રેલ્-યાનઃ ચેન્નૈનગરીમાગતઃ, તદા ભ્રુકુટિં કૃત્વા દન્તાન્ કટકટાય્ય ચ ઇતસ્તતઃ ચલન્તં "યદિ મમ દૃષ્ટિપથં ગતો ભવતિ તં નિર્વાહકં હનિષ્યામિ" ઇતિ વદન્તં દેવદત્તમિતરે અપશ્યન્ । અન્યતમઃ અન્યમવદત્, "અસૌ કુતઃ ભ્રાન્તચિત્ત ઇવ ઇત્થમુચ્ચૈર્જલ્પન્ અટતિ?" ઇતિ । સઃ પ્રત્યવદત્, "અસ્ય વિચિત્રચેષ્ટિતં ન કિઞ્ચિત્ ખલુ । પ્રાયેણ ત્વં જાલાર્પેટ્ટૈપુરે નિર્વાહકેન બલાત્ પ્રાબોધિતં રેલ્-યાનાત્ નિષ્કાસિતં ઇતોઽપ્યધિકમપભાષમાણં નરં નાપશ્યઃ" ઇતિ ।

## ૧૦. વિનોદપ્રિયતા-૧

નરસિંહઃ વયસ્યૈઃ સહ ન્યૂયાર્ક્ નગર્યાં કસ્મિંશ્ચિત્ બહુભૂમિસૌધે પઞ્ચાશત્તમ ભૂમૌ નિવસતિ સ્મ । કદાચિત્ તે યદા ઉદ્યોગાત્સ્વનિવાસં પ્રતિનિવર્તિતું પ્રવૃત્તાઃ તદા વિદ્યુત્-ભઙ્ગઃ અભવત્ । અતઃ નિવાસં પ્રાપ્તું સૌધસ્ય સોપાનશ્રેણિં પદ્ભ્યામેવ આરુહ્ય ગમનં તેષામનિવાર્યમભવત્ । સોપાનશ્રેણિમારોઢું પ્રવૃત્તાશ્ચ । આરોહણાયાસપરિહરણાય એકૈકઃ કાઞ્ચન કથાં શ્રાવયેત્ ઇતિ તૈઃ સ્વીકૃતઃ । નરસિંહં વિહાય સર્વે યથાશક્તિ કથાઃ શ્રાવયામાસુઃ । નરસિંહસ્તુ અવદત્, "અહં મમ કથામ્ આરોહણાન્તે એવ કથયામિ । સા કથા ભયાવહા વર્તતે " ઇતિ । ઇતરે સમમન્યન્ત ચ । તે યદા આરોહણસ્ય અન્તિમદશાં પ્રાપ્તાઃ તદા નરસિંહમિતરે અવદન્, "મિત્ર, ઇદાનીં તાવત્ તવ કથાં શ્રાવયસિ કચ્ચિત્?" ઇતિ । નરસિંહઃ કથયતિ, "ભો વયસ્યાઃ, ઇયમેવ મમ કથા । દ્વારતાલકસ્ય (door-lock) ઉદ્ઘાટકઃ

(key) મમ ઉદ્યોગસ્થાને એવ વર્તતે । અહં તં મયા સહ આનેતું વિસ્મૃતવાન્" ઇતિ ।

## ૧૧. મૌઢ્યમ્-૨

તામ્રકેશિન્યઃ લલનાઃ રૂપવત્યઃ અપિ મન્દબુદ્ધયઃ ઇતિ સર્વે આમનન્તિ ખલુ । કદાચિત્ કાશ્ચન તામ્રકેશિન્યઃ સમેત્ય કસ્યાઞ્ચિત્ પ્રાગલ્ભ્યસ્પર્ધાયામ્ ભાગમગૃહ્ણન્ । પ્રાશ્નિકઃ અન્યતમામપૃચ્છત્, "૧૪ ગુણ્યઃ, । ગુણકઃ, ફલં કિમ્?" । સા અવદત્, "૧૪૭" । ઇતરાઃ તામ્રકેશિન્યઃ એકસ્વરે ઉચ્ચૈરવદન્, "પ્રાશ્નિકઃ અન્યં પ્રશ્નં પૃચ્છતુ"
ઇતિ । તાસાં પ્રાર્થનાં સમ્માન્ય પ્રાશ્નિકઃ તામપૃચ્છત્, "દ્વિપઞ્ચાઙ્કયોઃ સંયોજનાત્ ફલિતમ્ કિમ્?" । સા ઝટિતિ પ્રત્યુત્તરમદાત્, "પઞ્ચવિંશતિઃ" । પુનરપિ સર્વા તામ્રકેશિન્યઃ ઉચ્ચૈરભાષન્ત, "અન્યં પ્રશ્નં પૃચ્છતુ" । પ્રાશ્નિકઃ અપૃચ્છત્, "એકસ્ય એકં સંયોજય" । સા વિચિન્ત્ય અવદત્, "દ્વે" । ઇતરાઃ પ્રસભં તારસ્વરેણ અવદન્, "કૃપયા પ્રાશ્નિકઃ અન્યં પ્રશ્નં પૃચ્છતુ" ।

## ૧૨. સ્ખલિતાભિજ્ઞાનમ્-૨

કાચન વૃદ્ધા પલિતકેશિની દન્તહીના નમિતાકૃતિઃ દણ્ડાવલમ્બિની વીથ્યાં શનૈર્ગચ્છતિ સ્મ । કશ્ચન યુવા તાં દૃષ્ટ્વા તસ્યાઃ વયોગૌરવાત્ તાં પ્રણનામ । સા સુદીર્ઘં તં વિલોક્ય સહર્ષમવદત્, "રે, બહૂનિ વર્ષાણિ ગતાનિ ખલુ ત્વાં વીક્ષ્ય! તદા કૃશઃ અદ્ય સ્થૂલઃ, તદા ઉપનેત્રં નાસીત્ અદ્ય ત્વં ઉપનેત્રધારી, તદા શ્મશ્રુહીનઃ ઇદાનીં તુ વદને પ્રભૂતં શ્મશ્રુ, ગચ્છતા કાલેન મહાન્ ખલુ વિકારઃ । ઇદાનીમેવ તવ નામ સ્મરામિ । તવ નામ રામસામિ ઇતિ " ।
- યુવા કિઞ્ચિદ્વિહસ્ય અવદત્, "આર્યે, મમ નામ રામસામિ ઇતિ ન, મમ નામ કૃષ્ણમૂર્તિઃ" ।
- વૃદ્ધા ઝટિત્યુવાચ, "તવ નામન્યપિ વિકારઃ કિમ્? કાલસ્ય ગતિઃ કિયતી કુટિલા!" ।

## ૧૩. કૃપણતા-૧

બ્રહ્મદત્તઃ નગર્યાં પ્રથિતઃ ધનિકઃ ન્યાયવાદી (lawyer) આસીત્ । તથાપિ કૃપણઃ સઃ કસ્મૈચિદપિ દીનાય કદાપિ ધનં ન દદૌ । દીનસહાયઃ દેવદત્તનામા તમાગત્ય અપૃચ્છત્, "આર્ય, ભવાન્ પ્રથિતઃ ન્યાયવાદી પ્રભૂતં ધનમર્જિતવાન્ ચ । કથમિદં યત્ ભવાન્ કદાપિ દીનેભ્યઃ સાહાય્યં ધનરૂપેણ ન કૃતવાન્" ઇતિ ।
બ્રહ્મદત્તઃ ગમ્ભીરસ્વરેણ અવદત્ । "ભોઃ, ભવતા વિદિતં કિં મમ માત્રા અર્બુદરોગગ્રસ્તયા રુગ્ણાલયસેવાર્થં પ્રત્યહં દશસહસ્રં રૂપ્યકાણિ વ્યયિતાનિ ઇતિ?" । કિઞ્ચિત્સમ્ભ્રાન્તઃ દેવદત્તઃ અવદત્, "ન વિદિતમ્" ઇતિ । બ્રહ્મદત્તઃ પુનરુવાચ, "ભવતા વિદિતં કિં યન્મમ કલત્રયુતઃ ભ્રાતા યુદ્ધે વ્રણિતઃ ભૂત્વા ઉદ્યોગાસમર્થઃ ચક્રયુતાસને સઞ્ચરન્ કાલં ક્ષપયતિ?"। દેવદત્તઃ કુણ્ઠિતવચનઃ નમ્રઃ બભૂવ । પુનરવદત્ બ્રહ્મદત્તઃ, "ભવતા વિદિતં કિં યન્મમ અનુજાયાઃ ભર્તા માર્ગાપઘાતે અમ્રિયત । મમ અનુજાયાઃ ત્રીણ્યપત્યાનિ ઇતિ?" ।
યાવત્ દેવદત્તઃ "ભવતઃ ક્ષમાં યાચે । નિતરાં દુઃખિતોઽસ્મિ" ઇતિ વિવદિષુરાસીત્ તાવદેવ બ્રહ્મદત્તઃ ઉવાચ, "યદ્યહં તેભ્યઃ કિઞ્ચિદપિ સાહાય્યં ન દત્તવાન્ ઇતરેભ્યઃ કિં પ્રયચ્છેયમ્?" ।

## ૧૪. મદ્યપાનમ્-૧

કશ્ચન બ્રહ્મદત્તનામા શુણ્ડાપાને આત્મનઃ ચષકસ્ય પુરતઃ ઉપવિષ્ટઃ પાનમપિબન્નેવ ચિન્તામગ્નઃ આસીત્ । અન્યઃ કશ્ચન વિશ્વદત્તનામા ધૂર્તઃ તં દૃષ્ટ્વા સપદિ તં પાનમપિબત્ । બ્રહ્મદત્તઃ રોદિતું પ્રારભત । વિશ્વદત્તઃ તં સાન્ત્વયિતુમવદત્, "ભ્રાતઃ, કુતઃ રોદિષિ? અહં અન્યમેકં પાનં તુભ્યં ક્રીણામિ । વિનોદાયૈવ ખલુ અહં તવ પાનમપિબમ્ "ઇતિ ।

બ્રહ્મદત્તઃ રુદન્નેવ પ્રત્યવદત્, "ભ્રાતઃ, કિં બ્રવીમિ? આપ્રાતઃ અદ્ય મમ મહતી દુર્દશા । પ્રાતઃ ચિરાય સુપ્તઃ ઉદ્યોગાલયં વેલામતિક્રમ્ય ગતઃ । મમ અધીક્ષકઃ કુપિતઃ ઉદ્યોગાત્ માં નિષ્કાસિતવાન્ । ગૃહં પ્રતિનિવર્તિતુમુદ્યતઃ અહં યાનનિઃસ્થાનમગચ્છં યત્ર મમ યાનઃ કેનાપિ ચોરેણ મુષિતઃ આસીત્ । ભાટકયાનમેકમારુહ્ય ગૃહમગચ્છમ્ । ભાટકયાને એવ અહં મમ ધનસ્યૂતમનવધાનેન ત્યક્તવાન્ । ગૃહં ગતઃ વિટપુરુષેણ સહ રમમાણાં મમ ભાર્યામપશ્યમ્ । વિષણ્ણઃ કિઙ્કર્તવ્યતામૂઢઃ શુણ્ડાપાનમાગત્ય પ્રાણત્યાગાર્થં વિષપૂર્ણં ચષકં પિપાસામિ । તદપિ ત્વં પિબસિ । અહો ધિઙ્માં દુર્ભાગ્યમ્ । "

## ૧૫. વિનોદપ્રિયતા-૨

અહં સાક્ષાત્કરં (television) વિલોકયન્ આસમ્ । દૂરવાણ્યાઃ ઘણ્ટા વ્યનદત્ । દૂરવાણ્યાં લલના કાચિદપૃચ્છત્, "સુન્દરેણ સહ સંલપિતુમિચ્છામિ" ।

અહમેકાકી વસામિ, મમ નામ સુન્દરો ન । દૂરવાણીસઙ્ખ્યાસ્ખલનં વ્યક્તમભવત્ । તથાપિ વિનોદાય તામહમવદમ્, "સુન્દરઃ અધુના અત્ર નાસ્તિ । સુન્દરાય અપિ કશ્ચિત્સન્દેશઃ?"

સા અવદત્, "સુન્દરઃ કદા પુનરાગમિષ્યતિ?"

"પ્રાયેણ દશવાદનસમયે આગમિષ્યતિ"

"ભવાન્ શ્યામઃ કિમ્?"

મમ નામ શ્યામઃ ન । તથાપ્યહમવદમ્, "બાઢમ્, અપિ કશ્ચિત્ સન્દેશઃ સુન્દરાય?" ઈષદ્પ્રક્ષુબ્ધવાણ્યા સા અવદત્, "સઃ મામવાદીત્", "અદ્ય રાત્ર્યાં ગૃહે એવ તિષ્ઠામિ । મયા સહ દૂરવાણ્યાં સંલપ" ઇતિ । " ।

અહમવદમ્, "સઃ એકહોરાયાઃ પ્રાક્ રેખયા સહ વિહર્તુમગચ્છત્"

ભૂયોઽપિ ક્રુદ્ધા સા અવદત્, "રેખા કા?"

"સા તસ્યાઃ પ્રિયવયસ્યા" ।

"તદવગતમ્ । પરન્તુ સા કા?"

"અહં ન જાને । અપિ કશ્ચિત્ સન્દેશઃ સુન્દરાય? "

"કૃપયા તં વક્તુમર્હસિ, "ગૃહમાગતઃ સઃ મયા સહ દૂરવાણ્યાં સંલપતુ" ઇતિ"

"અપિ ભવતી શ્યામા?" અહમપૃચ્છમ્ ।

"શ્યામા કા?" તસ્યાઃ કોપઃ પરાં કાષ્ઠાં પ્રાપ ।

“સઃ શ્યામયા સહ દશવાદનાત્ પશ્ચાત્ વિહર્તું ગમિષ્યતિ । ક્ષમાં યાચે । ભવતી શ્યામા ઇત્યચિન્તયમ્ । ”
“સુન્દરઃ ક્ષમાં યાચેત ન ભવાન્ । ભવાન્ કૃપયા સુન્દરં વક્તુમર્હતિ, “શીલા દૂરવાણ્યાં અવાદીત્ યત્ ત્વં તયા સહ સંલ્લપિતુમર્હસિ ઇતિ” । સપદિ તયા સમ્પર્કઃ ત્રુટિતઃ ।
ઈશ્વરઃ નિર્દોષં સુન્દરં રક્ષતુ માં ક્ષમતાં ચ ।

## ૧૬. દામ્પત્યમ્-૪

ન્યાયાધીશઃ: કચ્ચિત્ સ્વીકુરુષે યત્ ત્વમ્ ચતુર્વારં પરિધાનવિપણ્યાઃ ચોરયિતું અન્તરગચ્છઃ?
અભિયુક્તઃ: બાઢમ્, પ્રભો ।
ન્યાયાધીશઃ: ત્વં કિમચોરયઃ?
અભિયુક્તઃ: પરિધાનમેકમ્, પ્રભો ।
ન્યાયાધીશઃ: ચતુર્વારં ત્વં ભિત્તિં ભઙ્ક્ત્વા વિપણ્યાઃ અન્તરગચ્છઃ, કથમેકં પરિધાનમેવ અચોરયઃ ।
અભિયુક્તઃ: કિં કરવાણિ? ત્રિવારં મુષિતપરિધાનવર્ણઃ મમ પત્ન્યૈ નારોચત ।

## ૧૭. વાક્ચાતુર્યમ્-૧

પ્રથિતભૌતશાસ્ત્રજ્ઞઃ ઐન્શ્ટૈનઃ સાપેક્ષતાવાદમધિકૃત્ય વારં વારં નૈકવિદ્યાલયેષુ સભાઙ્ગણેષુ ભાષતે સ્મ । સભાયાં ઐન્શ્ટૈને ભાષમાણે તસ્ય કાર્-યાનસ્ય સારથિઃ સભાઙ્ગણસ્ય કસ્મિંશ્ચન પીઠે એવ ઉપવિશતિ સ્મ । ગચ્છત્સુ દિનેષુ ઐન્શ્ટૈનસ્ય ભાષણવાક્સ્રોતઃ સારથેઃ કણ્ઠગતમભવત્ ।
કાર્-યાનેન કદાચન તયોઃ સભાઙ્ગણં ગચ્છતોઃ, સારથિઃ ઐન્શ્ટૈનમવદત્, “આર્ય, યદા ભવાન્ ક્લાન્તઃ તદા અહમેવ ભવતઃ ભાષણં કર્તું યતે।” ઐન્શ્ટૈનઃ અવદત્, “તથાસ્તુ, અદ્ય એવ મમ સ્થાને મમ પરિધાનં પરિધાય ત્વમેવ ભાષસ્વ । અહં તવ પરિધાનં પરિધાય સભાયાં ઉપવિશામિ । “તૌ તથૈવ અકુરુતામ્ । સારથિઃ મનાગપિ સ્ખલનમ્ વિના બભાષે ।
ભાષણાનન્તરં કશ્ચન સભ્યઃ કઠિનં પ્રશ્નમેકમપૃચ્છત્ । સારથિઃ અસમ્ભ્રાન્તઃ તત્ક્ષણમેવ “આર્ય, તવ પ્રશ્નઃ અતીવ સરલઃ । મમ સારથિરપિ ઉત્તરં દાતું સમર્થઃ,” ઇતિ વદન્ ઐન્શ્ટૈનં અઙ્ગુલ્યા નિરદિશત્ ।

## ૧૮. દામ્પત્યમ્-૫

વૃદ્ધૌ બયસ્યૌ પરસ્પરમ્ સંલપન્તૌ આસ્તામ્ ।
“દેવદત્ત, અહો કાલસ્ય મહિમા, અસ્મદ્વયસ્યેષુ બહવો દિવં ગતાઃ । પરન્ત્વહં અસ્મદ્વયસ્યસ્ય બ્રહ્મદત્તસ્ય મરણં ભૂયો ભૂયો શોચામિ ।”
“કુત ઇત્થં, વયસ્ય ?”
“બ્રહ્મદત્તે ઉપરતે અહં તસ્ય વિધવાં પર્યણયં ખલુ ।”

## ૧૯. વાક્ચાતુર્યમ્-૨

ચન્દ્રદત્તસૂર્યદત્તૌ વયસ્યૌ પાદકન્દુકક્રીડાસક્તૌ પરસ્પરં સંલપન્તૌ આસ્તામ્ ।

ચન્દ્રદત્તઃ: વયસ્ય, અપિ સ્વર્ગે પાદકન્દુકક્રીડા પ્રચલતિ ?

સૂર્યદત્તઃ: ન જાને, પરન્તુ યદ્યહં ત્વત્તઃ પૂર્વં સ્વર્ગં ગચ્છેયં તદા તત્ર સા ક્રીડા પ્રચલતિ ન વા ઇત્યુદન્તં તુભ્યમ્ આગત્ય નિવેદયામિ ।

ચન્દ્રદત્તઃ: બાઢમ્, યદ્યહં ત્વત્તઃ પૂર્વં સ્વર્ગં ગચ્છેયં અહમપિ તથૈવ કરોમિ ।

વિધિવશાત્ સૂર્યદત્તઃ ચન્દ્રદત્તાત્ પૂર્વં દિવમગાત્ । કતિપયદિવસાનન્તરં સૂર્યદત્તઃ ચન્દ્રદત્તસ્ય પ્રત્યક્ષમભવત્ ।

ચન્દ્રદત્તઃ । વયસ્ય, સ્વર્ગાદાગતઃ કિમ્?

સૂર્યદત્તઃ :બાઢમ્

ચન્દ્રદત્તઃ: સ્વર્ગે કા વાર્તા? તત્ર પાદકન્દુકક્રીડા પ્રચલતિ કિમ્?

સૂર્યદત્તઃ: વયસ્ય, તુભ્યં વાર્તાદ્વયમાનયામિ । એકા શુભા અન્યા અશુભા ।

ચન્દ્રદત્તઃ: સ્વર્ગે પાદકન્દુકક્રીડા પ્રચલતીતિ શુભા વાર્તા ।

સૂર્યદત્તઃ । તુષ્ટોઽસ્મિ । કા ભવેદશુભા વાર્તા ?

ચન્દ્રદત્તઃ । આગામિનિ રવિવાસરે તત્ર ત્વં ક્રીડિષ્યસિ ।

## ૨૦. મદ્યપાનમ્-૨

રત્નદત્તઃ શુણ્ડાપાનં ગત્વા પાનમેકમક્રીણાત્ । ચષકાત્ કિઞ્ચિત્ પાનં પીત્વા શેષં પાનં પાનહરસ્ય મુખે પ્રાક્ષિપત્ । યાવત્ પાનહરઃ ચકિતઃ સમ્ભ્રાન્તશ્ચ વક્તુમુદ્યતઃ તાવદેવ રત્નદત્તઃ રોદિતું પ્રારભત પાનહરમવદચ્ચ, “સખે, તવ ક્ષમાં યાચે । કિં કરવાણિ । એતત્ દુષ્કર્મ મહતા યત્નેનાપિ રોદ્ધુમશક્તોઽહમ્ । પાને પાને એવમેવ કરોમિ । પરાં વ્રીડામનુભવામિ રોદિમિ ચ । જનાઃ કથયન્તિ એષઃ માનસિકવ્યાધિઃ ઇતિ । “પાનહરઃ સ્નેહશીલઃ અનુભવી ચ તમવદત્, “આર્ય, મા શુચઃ । મનોવૈદ્યમેકમહં જાનામિ । તેન સઙ્ગમ્ય તસ્ય ઉપદેશં પ્રાપ્નુહિ । શુભં ભૂયાત્” ઇતિ । રત્નદત્તઃ વૈદ્યસ્ય નામધામવિશેષાન્ પાનહરાત્ લબ્ધ્વા તસ્ય ઉપકૃતિં પ્રશસ્ય શુણ્ડાપાનાત્ નિરગચ્છત્ ।

ગતેષુ કતિપયમાસેષુ યદા રત્નદત્તઃ પુનરપિ તદેવ શુણ્ડાપાનમાગતઃ તદા તં પાનહરઃ અભ્યજાનાત્ તમવદચ્ચ, “આર્ય, અપિ ત્વં તં મનોવૈદ્યમગચ્છઃ¿‘રત્નદત્તઃ જગાદ, “બાઢં સખે । ત્વયાહં ભૂર્યુપકૃતોઽસ્મિ । મમ વ્યાધિઃ નિરસ્તઃ” ઇતિ । પાનહરઃ પ્રીતોઽભૂત્ ।

રત્નદત્તઃ યથાપૂર્વં પાનં ક્રીત્વા પાતું પ્રારભત । કિઞ્ચિત્ પીત્વા ચષકે અવશિષ્ટં પાનં યથાપૂર્વં પાનહરસ્ય મુખે પ્રાક્ષિપત્ । પાનહરઃ દિગ્ભ્રાન્તઃ રુષ્ટશ્ચ અભાષત, “આર્ય કિમિદમ્? પુનરપિ મમ મુખે પાનં પ્રક્ષિપસિ? વ્યાધિઃ નિરસ્તઃ ઇતિ ચ વદસિ¿‘ । રત્નદત્તઃ શાન્ત એવ અવદત્, “અથ કિમ્ । ઇદાનીં તુ યથાપૂર્વં કુર્વન્નપિ અહં વ્રીડિતો ન ભવામિ ન રોદિમિ ચ ।”

## ૨૧. મૌઢ્યમ્-૩

અમરસિંહઃ વયસ્યેન સહ કદાચન દેવાલયં ગતઃ । સર્વે પાદુકે અવતાર્ય દેવાલયં પ્રવિશન્તિ ખલુ । પાદસ્યૂતપાદુકાધારી અમરસિંહસ્તુ પદ્ભ્યાં પાદસ્યૂતૌ (socks) ચ અવતાર્ય દેવાલયં પ્રવિષ્ટઃ । પાદસ્યૂતયોઃ એકઃ કૃષ્ણવર્ણઃ અપરઃ રક્તવર્ણશ્ચ આસ્તામ્ । વયસ્યઃ તૌ દૃષ્ટ્વા અમરસિંહમપૃચ્છત્, "મિત્ર, કિમિદમ્? એકઃ પાદસ્યૂતઃ કૃષ્ણવર્ણઃ અન્યઃ રક્તવર્ણશ્ચ ભવતઃ ?" અમરસિંહઃ ઉત્તરમદાત્, "સખે, ન જાને કથમિત્થમભૂદિતિ । મમ ગૃહેઽપિ સદૃશૌ પાદસ્યૂતૌ સ્તઃ યયોઃ એકઃ રક્તઃ અન્યઃ કૃષ્ણશ્ચ" ।

## ૨૨. બાલચેષ્ટા-૨

કશ્ચન સજ્જનઃ મુહુર્મુહુઃ ઉત્પ્લવન્તં દ્વારઘણ્ઠાસઙ્ઘટ્ટને સતતં પ્રયતન્તમ્ કમપિ વામનં બાલકં કસ્યચિદ્ગૃહસ્ય પુરતઃ અપશ્યત્ । બાલકસ્ય સાહાય્યાર્થં સઃ સજ્જનઃ તત્સમીપં ગત્વા દ્વારઘણ્ઠાં સમઘટ્ટયત્, આત્મનઃ સુકૃત્યા નિતરાં પ્રીતશ્ચ તમવદત્, "તવ ઈપ્સિતં પ્રાપ્તં ખલુ । અદ્ય કિં કરવાવ?" ઇતિ । કિશોરઃ "કિં કરવાવ? આવાં દ્રુતં ધાવાવ" ઇત્યુચ્ચૈર્વદન્ સપદ્યેવ અધાવત્ ।

## ૨૩. દામ્પત્યમ્-૬

કશ્ચન પુરુષઃ તસ્ય વૈદ્યમવદત્, "મમ ભાર્યાયાઃ શ્રવણસૂક્ષ્મતા ક્ષયં જિગમિષતીવ ભાતિ । કિં કરણીયમ્?" વૈદ્યઃ પ્રત્યવદત્, "ભવાન્ પ્રથમતઃ ઇમાં પરીક્ષાં કરોતુ । મહાનસે કિમપિ કાર્યં કુર્વત્યાઃ તસ્યાઃ પશ્ચાત્ વિંશતિહસ્તદૂરે સ્થિતઃ ભવાન્ તાં પ્રશ્નમેકં પૃચ્છતુ । સા યદિ પ્રત્યુત્તરં ન દદાતિ તદા દશહસ્તદૂરે સ્થિતઃ તમેવ પ્રશ્નં પૃચ્છતુ । તદાપિ સા પ્રત્યુત્તરં ન દદાતિ ચેત્ તદા પઞ્ચહસ્તદૂરે સ્થિતઃ તમેવ પ્રશ્નં પૃચ્છતુ । યાવત્ સા પ્રત્યુત્તરં ન દદાતિ તાવત્ ઇત્થં તસ્યાઃ સમીપં ગચ્છન્ પ્રશ્નમાવર્તયતુ । તદા તસ્યાઃ શ્રવણસૂક્ષ્મતા કિયતીત્યવગતા ભવતિ । "

પુરુષઃ ગૃહં ગત્વા મહાનસે અન્નં પચન્ત્યાઃ ભાર્યાયાઃ પશ્ચાદેત્ય વિંશતિહસ્તદૂરે સ્થિતઃ અપૃચ્છત્, "પ્રિયે, અદ્યાવયોઃઅશનાય કિમ્ "ઇતિ । યદા સા ન પ્રત્યવદત્ સઃ પઞ્ચદશહસ્તદૂરે સ્થિતઃ તમેવ પ્રશ્નમપૃચ્છત્ । સા તદાપિ ન પ્રત્યવદત્ । દશહસ્તદૂરે સ્થિતઃ પ્રશ્નમપૃચ્છત્ । પઞ્ચહસ્તદૂરે સ્થિતઃ પ્રશ્નમપૃચ્છત્ । યદા દ્વિહસ્તદૂરે સ્થિતઃ પ્રશ્નમપૃચ્છત્ તદા તસ્યાઃ ઉત્તરમશ ૃણોત્, "ત્રિવારમહમકથયમ્, "અદ્ય કદલીશાકસમન્વિતંસૂપમ્ દધ્યન્નં ચ ઇતિ" । તવ શ્રવણસૂક્ષ્મતા શોચનીયા ખલુ" ।

## ૨૪. વાક્ચાતુર્યમ્-૩

એકદા કેચન જનાઃ વિમાને પ્રયાન્તિ સ્મ । મધ્યેમાર્ગં વિમાનસ્ય યાનયન્ત્રે દોષઃ સમપદ્યત । પતનભીતિઃ પ્રાદુરભૂત્ । આપત્કાલે વિમાનકઞ્ચુકી સર્વેષાં પ્રાણરક્ષકકઞ્ચુકાન્ વિતરતિ ખલુ । તથૈવ વિમાનકઞ્ચુકી યથાવિધિ વિતરણાર્થં કઞ્ચુકાન્ સઙ્ખ્યાય સર્વાન્ ઇત્થમવદત્, "ભોઃ, નિવેદિતું દુઃખિતોઽસ્મિ યત્ વિમાનપતનભીતિરસ્તિ । અત્ર કશ્ચિત્ ધર્મનિષ્ઠઃ અસ્તિ કિં યઃ ઈશ્વરં ભક્ત્યા પ્રાર્થયિતું શક્તઃ?" સજ્જન એકઃ અવદત્, "અહં ધર્મનિષ્ઠઃ દૈવભક્તશ્ચ ।

અહં સર્વેષાં ક્ષેમાય ઈશ્વરં પ્રાર્થયામિ" ઇતિ । વિમાનકઞ્ચુકી તં સજ્જનમવદત્, "આર્ય, કૃતજ્ઞોઽસ્મિ । અત્ર વયં એકવિંશતિઃ સ્મઃ । પરન્તુ પ્રાણરક્ષકકઞ્ચુકાસ્તુ વિંશતિરેવ સન્તિ । કૃપયા ભવાન્ આત્મનઃ ક્ષેમાય ઈશ્વરં પ્રાર્થયતુ । અન્યેભ્યઃ અહં કઞ્ચુકાન્ વિતરામિ" ઇતિ ।

## ૨૫. શ્વશ્રૂઃ-સ્નુષા-૨

સ્નુષાઃ શ્વશ્રુવઃ પરસ્પરં બહુમાનેન ન અવલોકયન્તિ ઇતિ પ્રથા અસ્તિ ખલુ । તાં પ્રથાં પ્રત્યાખ્યાતું કાશ્ચન સ્નુષાઃ શ્વશ્રુવઃ યોજનામેકામરચયન્ । યોજના સર્વાઃ દૂરસ્થિતં દેવાલયમેકં સન્દૃશ્ય તત્ર શ્વશ્રૂણાં સ્નુષાણાં પરસ્પરં પ્રીતિપૂર્વકવૃત્ત્યર્થમ્ ઈશ્વરં પ્રાર્થયિષ્યન્તિ ઇત્યેષા આસીત્ । પરન્તુ શ્વશ્રુવઃ એકેન બસ્-યાનેન દેવાલયં ગતા સ્નુષાઃ અન્યેન બસ્-યાનેન ગતાઃ । વિધિવશાત્ શ્વશ્રૂણાં યાનં દુર્ઘટનાગ્રસ્તમભવત્ સર્વાઃ બસ્-યાનસ્થિતશ્વશ્રુવઃ મૃતાશ્ચ । સ્નુષાઃ દુઃખદાં વાર્તામશ ૃણ્વન્ અશ્રૂણ્યમુઞ્ચન્ ચ । પરન્તુ એકા સ્નુષા પ્રભૂતં રોદિતું પ્રારભત । અન્યાભિઃ સાન્ત્વનં નિષ્ફલમભવત્ । "કુતઃ ઇયતીં યાતનામનુભવસિ ઇતિ પૃષ્ટા સા પ્રત્યવદત્, "મમ શ્વશ્રૂઃ તદ્યાને ન પ્રાતિષ્ઠત ગૃહે એવ તિષ્ઠતિ" ઇતિ ।

- - - -

## ૨૬. દામ્પત્યમ્-૭

દમ્પતી કલહમકુરુતામ્ । પશ્ચાત્ પરસ્પરં મૌનમાચરતામ્ । અપરેદ્યુઃ પતેઃ સૂર્યોદયાત્ પ્રાગેવ ઉદ્યોગાય ગમનં સમપદ્યત । અતઃ તસ્ય પ્રાતઃપ્રાબોધનાર્થં પત્નીં પ્રતિ પ્રાર્થના આવશ્યકી અભવત્ । તથાપિ તાં પ્રતિ મૌનં ભઙ્ક્તું નૈચ્છત્ । અતઃ રાત્રૌ તસ્યૈ પત્રકમેકમલિખત્, "માં પ્રાતઃ પઞ્ચવાદનસમયે પ્રાબોધય" ઇતિ । તં પત્રકં તસ્યાઃ ઉપધાનસ્ય ઉપરિ ન્યવેશયત્ ।

અપરેદ્યુઃ યદા પતિઃ જાગૃતઃ તદા અષ્ટવાદનસમયઃ આસીત્ । યાવત્ ક્રુદ્ધઃ પત્નીં પિપ્રચ્છિષુરાસીત્ તાવદેવ આત્મનઃ ઉપધાનસ્ય નિકટે પત્રકમેકમપશ્યત્ । તસ્મિન્ પત્ન્યા લિખિતમાસીત્, "ઇદાનીં પઞ્ચવાદનસમયઃ જાગૃહિ" ઇતિ ।

## ૨૭. વાક્ચાતુર્યમ્-૪

કદાચિત્ આઙ્ગ્લલોકસભાયાં કશ્ચન સભ્યઃ ભાષણં કુર્વતીં સભ્યામુદ્દિશ્ય ઇત્થમવદત્, "યદ્યહં ભવત્યાઃ પતિરભવિષ્યમ્ તદા ભવત્યૈ વિષમદાસ્યમ્" । સા સભ્યા સપદ્યેવ પ્રત્યવદત્, "મહોદય, અથ કિમ્, યદિ ભવાન્ મમ પતિરભવિષ્યત્ નિસ્સંશયમહં સહર્ષં તદ્વિષમપાસ્યમ્" ઇતિ ।

## ૨૮. બાલચેષ્ટા-૩

કશ્ચિત્ પોગણ્ડઃ તસ્ય અનુજેન અર્ભકેન સહ ગૃહાદ્બહિઃ ખેલતિ સ્મ । સહસા અર્ભકઃ ઉચ્ચૈઃ રોદિતું પ્રારભત । તયોઃ પિતામહઃ ગૃહાદ્બહિરાગત્ય તં પોગણ્ડમવદત્, "અર્ભકં કિમર્થં રોદયસિ? સઃ યદ્વાઞ્છતિ તદ્દેહિ" ઇતિ । પોગણ્ડઃ

પ્રત્યવદત્, “અર્ભકઃ આતપે શોષણાર્થં નિવેશિતં રક્તં મરિચં વાઞ્છિતવાન્ । તસ્મૈ તમહં દત્તવાન્ । સઃ મરિચં વદને નિક્ષિપ્ય ઇદાનીં રોદિતિ” ઇતિ ।

## ૨૯. વાક્ચાતુર્યમ્-૫

કદાચન કાનિચન મિત્રાણિ સપણમદીવ્યન્ । તેષુ બ્રહ્મદત્તો નામ દેવને પરાજિતઃ પઞ્ચસહસ્રરૂપ્યકમિતં ધનહાનિમવાપ્તવાન્ હૃદયાઘાતેન તત્રૈવ મૃતિમગાચ્ચ । ઇતરાણિ મિત્રાણિ શોકસૂચનાર્થમુત્થાય પુનઃ દેવને નિરતાણ્યભવન્ । દેવનાન્તે એકઃ અવદત્, “અસ્માસુ કઃ બ્રહ્મદત્તસ્ય પત્ન્યૈ દુખવાર્તાં નિવેદયતિ? “ઇતિ । અન્યઃ દેવદત્ત નામા અવદત્, “અહં સમીક્ષ્ય કૌશલેન યથા સા ભૃશં ન ક્લિશ્યતે તથા સ્તોકં નિવેદયામિ” ઇતિ । સઃ બ્રહ્મદત્તસ્ય ગૃહં ગત્વા બ્રહ્મદત્તસ્ય ભાર્યામવદત્, “ભવતિ, ભવત્યાઃ ભર્તા અદ્ય દેવને રૂપ્યકાનાં પઞ્ચસહસ્રાત્ ચ્યુતઃ” ઇતિ । સા ભ્રુમુટિં કૃત્વા ઝટિત્યવદત્, “વદ તં મૃતિં યાતુ “ઇતિ । દેવદત્તઃ પ્રસહ્ય “ભવતિ તથૈવ નિવેદયામિ “ઇતિ વદન્ તસ્યાઃ ગૃહાત્ નિષ્ક્રાન્તઃ ।

## ૩૦. શિતબુદ્ધિઃ-૧

બાલકેન સહ પુરુષ એકઃ શ્મશ્રુવર્ધકવિપણિં પ્રવિષ્ટઃ । પુરુષઃ શ્મશ્રુસંસ્કારપીઠમારુરોહ । શ્મશ્રુવર્ધકઃ તસ્મૈ યથાવિધિ શ્મશ્રુસંસ્કારં કૃતવાન્ ચ । તદનન્તરં પુરુષ અવદત્, “ભોઃ, ઇદાનીં અસ્મૈ બાલકાય શ્મશ્રુસંસ્કારં ભવાન્ કરોતુ । અત્રાન્તરે કાર્યમન્યં કૃત્વા પુનરાગચ્છામિ । “પુરુષઃ નિર્ગતશ્ચ । શ્મશ્રુવર્ધકઃ પુરુષસ્ય વચઃ સંમાન્ય બાલકસ્ય શ્મશ્રુસંસ્કારં કૃત્વા બાલકમવદત્, “બાલ, અત્રૈવ તવ પિત્રે પ્રતીક્ષસ્વ । શીઘ્રમેવ આગમિષ્યતિ” ઇતિ । બાલકઃ અવદત્, “સઃ મમ પિતા ન ભવતિ । માર્ગે માં દૃષ્ટ્વા અવદત્, “તવ શ્મશ્રુસંસ્કારં કારયામિ । મયા સહ આગચ્છ” ઇતિ । અતઃ તેન સહ અહમાગતઃ” ઇતિ । વઞ્ચિતઃ શ્મશ્રુવર્ધકઃ પુરુષસ્ય બાલકસ્ય ચ શ્મશ્રુસંસ્કારં મૂલ્યં વિનૈવ અકરોત્ ખલુ ।

## ૩૧. વાક્ચાતુર્યમ્-૬

પ્રસિદ્ધલેખકઃ જાર્જ્ બર્નાર્ડ્ ષાવર્યઃ કદાચિત્ પ્રસિદ્ધરાજનયપ્રસક્તાય વિન્સ્ટન્ ચર્ચિલાય આત્મનઃ નાટકસ્ય પ્રથમપ્રદર્શનં દ્રષ્ટું પ્રવેશપત્રં પ્રાહિણોત્ । ચર્ચિલઃ ષાવર્યાય ઉત્તરપત્રમલિખત્ । “અનુગૃહીતોઽસ્મિ । પરન્તુ અનવધાનાત્ પ્રથમપ્રદર્શનં દ્રષ્ટું ન શક્નોમિ । ભવતઃ નાટકસ્ય દ્વિતીયપ્રદર્શનં ભવેદ્યદિ અહં તદ્દ્રષ્ટુમિચ્છુઃ અસ્મિ । “અભિભૂતઃ ષાવર્યઃ દ્વિતીયપ્રદર્શનાર્થં ચર્ચિલાય દ્વે પ્રવેશપત્રે પ્રાહિણોત્ ઇત્થમલિખચ્ચ, “મહોદય, દ્વે પ્રવેશપત્રે પ્રેષિતે । યદિ ભવતઃ કોઽપિ સુહૃત્ ભવેત્ તમપિ આનયતુ” ઇતિ ।

## ૩૨. દામ્પત્યમ્-૮

કેચન સ્ત્રિયૌ સમલપતામ્:

એકા । અહં નિતરાં ક્લાન્તા । સદૈવ મમ ભર્ત્રા સહ કલહઃ સમ્ભવતિ । અતઃ મમ ભારઃ દશકિલોમિતઃ ન્યૂનતરઃ જાતઃ ।

અન્યા । દુઃખિતાઽસ્મિ । કુતસ્ત્વં વિવાહવિચ્છેદં ન કુર્યાત્?

એકા । અધુનૈવ ન । મમ ભારઃ અદ્યાપિ સમુચિતભારાત્ દશકિલોમિતઃ અધિકતર એવ વર્તતે ।

## ૩૩. દામ્પત્યમ્-૯

યેન ચોરેણ સ્વગૃહે ભિત્તિચૌર્યં કૃતં સઃ આરક્ષકૈઃ બદ્ધઃ વર્તતે ઇતિ વાર્તાં શ્રુત્વા કશ્ચન પુરુષઃ આરક્ષકાલયં ગત્વા આરક્ષકમવદત્, "ભોઃ, અહં ચોરેણ સહ સંલપિતુમિચ્છામિ "ઇતિ । આરક્ષકેન કિમર્થમિતિ પૃષ્ટઃ સઃ પ્રત્યવદત્, "ચોરં પ્રષ્ટુમિચ્છામિ, "મમ ભાર્યાં પ્રબોધયન્ વિના રાત્રિમધ્યં કથં ત્વં ગૃહં પ્રવેષ્ટવાન્ । અહં ચિરકાલાત્ તથા કર્તુમશક્તોઽસ્મિ "ઇતિ ।

## ૩૪. વાક્ચાતુર્યમ્-૭

કશ્ચિત્ દીનઃ યાચકઃ પથિ દેવસિંહં યત્કિઞ્ચિદ્ધનમયાચત ।

દેવસિંહઃ । યદિ દ્વે રૂપ્યકે તુભ્યં દદામિ તદા ત્વં પાનશુણ્ડાં ગત્વા મદ્યં ક્રીણાસિ કિમ્?

યાચકઃ । ન કદાચિત્, પ્રભો ।

દેવસિંહઃ । દેવનગૃહે ધનસ્ય પણસે કિમ્?

યાચકઃ । ન કદાચિત્, પ્રભો ।

દેવસિંહઃ । કૃપયા મયા સહ મદ્ગૃહમાગચ્છ । મદ્યેન વિના દેવનેન વિના નરસ્ય કા અવસ્થા ભવતીતિ મમ ભાર્યા પશ્યતુ ।

## ૩૫. દામ્પત્યમ્-૧૦

ભાર્યા મહાનસે ઇતસ્તતઃ પરિભ્રમન્તં મક્ષિકાહનને ઉદ્યતમ્ ભર્તારમપશ્યત્ ।

ભાર્યાઃ કિં કુરુષે?

ભર્તાઃ મક્ષિકાહનને ઉદ્યતોઽહમ્ ।

ભાર્યાઃ સફલઃ અભૂઃ કચ્ચિત્ ?

ભર્તાઃ નિસ્સંશયમ્ । પઞ્ચમક્ષિકાઃ અવધિષમ્ । તાસુ તિસ્રઃ મક્ષિકાવધૂઃ ।

ભાર્યાઃ સ્ત્રીપુરુષવિવેકઃ કથમભૂત્?

ભર્તાઃ સઃ સ્પષ્ટ એવ । તિસ્રઃ દૂરભાષાયન્ત્રસ્ય ઉપરિ સ્થિતાઃ દ્વૌ મદ્યચષકસ્યોપરિ સ્થિતૌ ।

## ૩૬. વાક્ચાતુર્યમ્-૮

કાચન લલના વિપણિવીથ્યાં ગચ્છન્ વિપણ્યાં પઞ્જરસ્થં શુકમેકમપશ્યત્ । શુકસ્ય સૌન્દર્યમનુભવન્ તત્રૈવ ક્ષણમાત્રં તસ્થૌ । શુકઃ તામવદત્, "ભવતિ, કુરૂપાસુ પ્રથમા ખલુ ભવતી" ઇતિ । અતિકુપિતા સા ભ્રુકુટિં કૃત્વા દ્રુતં સ્વોદ્યોગાય નિર્જગામ । યદા સા સાયમુદ્યોગાત્ પ્રતિન્યવર્તત તદાપિ તં શુકમપશ્યત્ । તદાપિ શુકઃ તામવદત્, "ભવતિ, કુરૂપાસુ પ્રથમા ખલુ ભવતી" ઇતિ । પરેદ્યુઃ યદા સા સ્વોદ્યોગાય ગચ્છન્ તં શુકમપશ્યત્, સ શુકઃ પુનરુવાચ, "ભવતિ, કુરૂપાસુ પ્રથમા ખલુ ભવતી" ઇતિ । અતીવ કુપિતા સા તદ્વિપણિં પ્રવિશ્ય આપણિકમવદત્, "અયિ, ભોઃ, તવ શુકઃ દુર્વચાંસિ વદતિ । યદિ સઃ પુનરપિ યદિ તથૈવ કથયતિ અહં રાજભટે અભિયોગં દાસ્યામિ" ઇતિ । આપણિકઃ તસ્યાઃ ક્ષમામયાચત અવદચ્ચ, "ભવતિ, અદ્યપ્રભૃતિ સઃ શુકઃ દુર્વચાંસિ યથા ત્વાં ન ભણતિ તથા કરોમિ" ઇતિ । સાયમુદ્યોગાત્ પ્રતિનિવર્તનસમયે સા સકુતૂહલં તં શુકમપશ્યત્ । તદા શુકઃ અવદત્, "આર્યે" ઇતિ । સા ભ્રુકુટિં કૃત્વા પ્રત્યવદત્, "તતઃ કિમ્" । સઃ શુકઃ સગર્વમભણત્, "મમ કથનેન કિમ્? ભવતી વેત્તિ ખલુ" ઇતિ ।

## ૩૭. વૈદ્યઃ-૧

વૃદ્ધૌ સ્વવૈદ્યયોઃ વિષયે સંલપતઃ સ્મ । પ્રથમઃ અવદત્, "ભોઃ, તવ વૈદ્યઃ વિશ્વાસાનર્હઃ । કસ્મૈચિદ્રુગ્ણાય સઃ મૂત્રપિણ્ડવ્યાધિનિવારણાર્થં ઔષધાનિ પ્રાયચ્છત્ । સ રુગ્ણઃ પિત્થકોશવ્યાધિના મૃતઃ ખલુ" ઇતિ । દ્વિતીયઃ અવદત્, "તવ વૈદ્યસ્ય વિષયે કિં ભણસિ?" ઇતિ । પ્રથમઃ પ્રત્યવદત્, "યદિ મમ વૈદ્યઃ તુભ્યં મૂત્રપિણ્ડવ્યાધિનિવારણાય ઔષધાનિ પ્રદાસ્યતિ, તદા ત્વં નિસ્સંશયં મૂત્રપિણ્ડવ્યાધિના એવ મરિષ્યસિ" ઇતિ ।

## ૩૮. દામ્પત્યમ્-૧૧

અમેરિકાદાગતૌ દમ્પતી અરબ્-દેશે પ્રયાતઃ સ્મ । તત્ર કશ્ચન અરબ્-દેશસ્થઃ તૌ દૃષ્ટ્વા ભર્તારમવદત્, "ભોઃ, ઉષ્ટ્રાણાં શતં તુભ્યં દાસ્યામિ । ત્વં તવ સ્ત્રિયં મહ્યં દેહિ" ઇતિ । ચિરેણ વિચિન્ત્ય ભર્તા તમવદત્ । "મમ સ્ત્રિયં ન દાસ્યામિ । સા વિક્રયાય ન ભવતિ" ઇતિ । કુપિતા ભાર્યા ભર્તારમવદત્, "કુતસ્ત્વં તદ્વક્તું ચિરેણ વિચિન્તયસિ?" ઇતિ । ભર્તા પ્રત્યવદત્, "ઇતઃ અમેરિકામુષ્ટ્રાણાં શતં કથં નેષ્યામિ ઇત્યચિન્તયમ્" ઇતિ ।

## ૩૯. વિનોદપ્રિયતા-૧

મદ્યપાનજનિતદુષ્પરિણામાનાં વિષયે કશ્ચન પ્રાજ્ઞઃ સભાયાં ભાષતે સ્મ । સઃ સર્વેષાં બોધયિતું પ્રયોગમેકમકરોત્ । ચષકં મદ્યેન પૂરયિત્વા ચઞ્ચલં કૃમિમેકં તસ્મિન્ ન્યક્ષિપત્ । કૃમિઃ તૂર્ણમમ્રિયત । તદા સભામુદ્દિશ્ય અભાષત । "આર્યાઃ, કથયત, અસ્માત્ પ્રયોગાત્ કિમવગતમ્?" । ધર્મદત્તઃ ઝટિત્યુત્થાય અવદત્, "ભોઃ, ઇદં સુસ્પષ્ટમ્ । મદ્યપાનં કૃમિરોગં રુણદ્ધિ"ઇતિ ।

## ૪૦. શિતબુદ્ધિઃ-૨

કૃષીવલઃ કૃચ્છ્રેણ ગોડુમ્બાનવર્ધયત્ પરન્તુ ચોરાઃ પક્વાનિ ગોડુમ્બાનિ (water melons) ચોરયન્તિ સ્મ । ચોરાન્ નિરોદ્ધું સઃ દારુફલકે "સાવધાના ભવેત, અત્ર ગોડુમ્બનિવહે કિઞ્ચનગોડુમ્બં વિષપૂરિતં વર્તતે" ઇતિ લિખિત્વા દારુફલકં ક્ષેત્રસ્ય પુરતઃ અસ્થાપયત્ । ન કોઽપિ પક્વાનિ ફલાન્યચોરયત્ કૃષીવલઃ કૃતાર્થઃ પ્રીતઃ અભવચ્ચ । પરન્તુ કતિપયદિનેષુ ગતેષુ યદા કૃષીવલઃ ક્ષેત્રમગચ્છત્ તદા તત્ર ફલકે, "સાવધાના ભવેત । ઇદાનીમસ્મિન્ ક્ષેત્રે દ્વે ફલે વિષપૂરિતે સ્તઃ" ઇતિ લિખિતં દૃષ્ટ્વા દિઙ્મૂઢઃ અભવત્ ।

## ૪૧. દામ્પત્યમ્-૧૨

તસ્મિન્ દિવસે વૃદ્ધદમ્પત્યોઃ વિવાહાદનન્તરં પઞ્ચાશદ્વર્ષાઃ ગતાઃ આસન્ । દમ્પતી ઔત્સુક્યેન સમ્ભ્રમેણ ચ તદવસરમુત્સવરૂપેણ આચરતઃ સ્મ । સાયમીશ્વરં પ્રાર્થયિતું દેવાલયં ગતૌ । પ્રીતઃ ઈશ્વરઃ પ્રત્યક્ષો ભૂત્વા તાવવદત્, "ભોઃ, યુવયોઃ અન્યોન્યપ્રેમ્ણા પ્રીતોઽસ્મિ । યુવાં પૃથક્ પૃથક્ વરમેકં યાચેથામ્ । "પત્ની પ્રથમં વરમયાચત, "પ્રભો, અહં મમ પત્યા સહ જગત્પર્યટનં કર્તુમિચ્છામિ" ઇતિ । ઈશ્વરઃ પ્રત્યવદત્, "તથાસ્તુ, પત્યુરાશા તુ કા" ઇતિ । ઝટિતિ ચપલચિત્તઃ પતિરવદત્, "પ્રભો, વયસિ મત્તઃ ત્રિંશત્વર્ષૈઃ ન્યૂનાં ભાર્યાં વાઞ્છામિ" ઇતિ । "તથાસ્તુ । શ્વઃ પ્રભાતે યુવયોઃ વાઞ્છે ફલિષ્યતઃ" ઇતિ વદન્ ઈશ્વરઃ અન્તર્દધે । પત્ની નિતરાં દુઃખિતા અભવત્, પતિઃ નિતરાં હૃષ્ટોઽભવત્ । પૃથક્ પૃથક્ પર્યઙ્કે સુપ્તવન્તૌ કથમપિ રાત્રિમનયતામ્ । શર્વર્યાં પ્રભાતાયાં કોઽપિ દૂતઃ જગત્પર્યટનાય તાભ્યાં વિમાનાનુમતિપત્રમાનયત્ । પત્ની એવ ઉત્થાય યાનાનુમતિપત્રં જગ્રાહ । વૃદ્ધઃ પતિઃ પર્યઙ્કાદુત્થાતું ન શશાક । હન્ત, સઃ પત્ન્યાઃ વયસિ ત્રિંશદ્વર્ષૈઃ જ્યાયાન્ સમભવત્ ખલુ ।

## ૪૨. દેવનમ્-૧

દેવસિંહઃ દેવનશૂરઃ ઇતિ પ્રથિતઃ આસીત્ । કાર્યાલયેઽપિ સર્વૈઃ સહ પણબન્ધં કૃત્વા દીવ્યતિ સ્મ । કાર્યાલયસ્ય કાર્યે અનાસક્તઃ કાર્યમગ્નાનન્યાન્શ્ચ બાધતે સ્મ । કાર્યાલયસ્ય અધીક્ષકઃ તસ્ય દેવનમોહજાતહાનિમસહમાનઃ તં સ્વકોષ્ઠમાગન્તુમાદિદેશ । દેવસિંહઃ કોષ્ઠં યથાનિર્દિષ્ટં પ્રવિવેશ ચ ।

"દેવસિંહ, કાર્યાલયે દેવનં ન કાર્યમિતિ ત્વયા વિદિતમેવ । તથાપિ દેવને સક્તઃ અન્યાન્શ્ચ બાધસે । અદ્યપ્રભૃતિ દેવનાત્ વિરમેઃ । દેવનાત્ વિરમસિ ન ચેત્ ત્વામુદ્યોગાત્ નિસ્કાસયિષ્યામિ"। દેવસિંહઃ, "યથાજ્ઞાપયત્યાર્યઃ" ઇતિ વદન્ શનૈઃ કોષ્ઠાત્ નિષ્ક્રાન્તઃ । કતિપયક્ષણેષુ દેવસિંહઃ અધીક્ષકસ્ય કોષ્ઠં તસ્ય અનુમતિમાદાય પુનઃ પ્રવિવેશ અવદચ્ચ, "આર્ય, કાર્યાલયે અદ્યૈવ મમ અન્તિમદેવનં ભવતિ ખલુ । અતઃ અધુના ભવતા સહ દેવિતુમિચ્છામિ । અનુમન્યતામાર્યઃ" । અધીક્ષકઃ વિહસ્ય અવદત્, "મયા સહ કિં દેવનમ્? કઃ પણઃ?" । દેવસિંહઃ ઝટિત્યવદત્, "આર્ય ભવતઃ ઉરોપૃષ્ઠદેશે બૃહત્શ્યામચિહ્નમસ્તિ । ભવાન્ વેત્તિ કિમ્?" । ચકિતઃ અધીક્ષકઃ અવદત્, "કિમ્ વદસિ? ન કદાપિ । નિસ્સંશયં મમ ઉરોપૃષ્ઠદેશે કિમપિ ચિહ્નં નાસ્તિ"। દેવસિંહઃ પ્રત્યવદત્, "આર્ય, ચિહ્નં ન ભવતિ ચેત્ સહસ્રરૂપ્યકાનિ ભવતે દાસ્યામિ । પરન્તુ ઇદાનીમેવ પરીક્ષા ભવેત્ । "અધીક્ષકઃ મનસ્યેવ અચિન્તયત્, "મૂઢોઽસૌ વિના કારણં મહ્યં સહસ્રં રૂપ્યકાનિ દાતું સિદ્ધોઽસ્તિ । બાઢમ્, તસ્મૈ સમુચિતં પાઠમુપદિશામિ । મમાપિ સહસ્રં

રૂપ્યકાનાં લાભો ભવતિ" । "દેવસિંહ, વૃથા પરાજિતો ભવસિ । મૂર્ખસ્ત્વમ્ । પશ્ય કિમસ્તિ?" ઇતિ વદન્ કઞ્ચુકં શરીરાદપાનયત્ વિવસ્ત્રમુરોપૃષ્ઠમ્ દેવસિમ્હાય અદર્શયચ્ચ । તૂર્ણં દેવસિંહઃ કોષ્ઠાત્ બહિઃ સ્થિતં સહોદ્યોગિનં હરદત્તનામાનમાહ્વયત્, "હરદત્ત, આગચ્છ, પશ્ય, અધીક્ષકસ્ય વિવસ્ત્રમુરોપૃષ્ઠમ્ । યથાપ્રતિજ્ઞાતં મહ્યં દ્વિસહસ્રં રૂપ્યકાનિ દેહિ" ઇતિ ।

## ૪૩. હાસ્યકૃચ્છ્રઃ-૧

શસ્ત્રચિકિત્સાર્થં રુગ્ણાલયં પ્રવેશિતસ્ય બ્રહ્મદત્તસ્ય તદાનીં શસ્ત્રચિકિત્સા કરણીયા આસીત્ । તદા કાચન શુશ્રૂષિકા સચક્રાસન્ધ્યામ્ ઉપવિષ્ટં તથાપિ સોદ્વેગં સ્વહસ્તાભ્યાં દ્રુતં સચક્રાસન્ધ્યાઃ ચક્રે ચાલયન્તં વૈદ્યશાલાયાઃ પ્રાઙ્ગણે ભ્રમન્તં તમપશ્યત્ । તયા સોદ્વેગભ્રમણસ્ય કારણં પૃષ્ટઃ બ્રહ્મદત્તઃ પ્રત્યવદત્, "ભોઃ, શસ્ત્રચિકિત્સાગારે સ્થિતા શુશ્રૂષિકા અવાદીત્, "મા ભૈષીઃ, શસ્ત્રચિકિત્સા નિર્વિઘ્નં સુખાન્ત્યં ભવિષ્યતિ" ઇતિ । શુશ્રૂષિકા પ્રત્યવદત્, "ભોઃ, યદિ સા ત્વામ્ ઇત્થમવાદીત્ ત્વં નિર્ભયો ભવેઃ ખલુ?" ઇતિ । બ્રહ્મદત્તઃ પ્રત્યવદત્, "ભોઃ, સા માં નાવાદીત્, સા શસ્ત્રચિકિત્સકમવાદીત્ ખલુ!" ઇતિ ।

## ૪૪. વાક્ચાતુર્યમ્-૯

કસ્મિંશ્ચિદ્ગ્રામે "પ્રહ્લાદચરિત્રમ્"નામ નાટકં નાટ્યતે સ્મ । તત્ર બ્રહ્મદત્તદેવદત્તૌ હિરણ્યકશિપુપ્રહ્લાદપાત્રધારિણૌ આસ્તામ્ । કેનાપિ કારણેન નાટકપ્રયોજકેન હિરણ્યકશિપુપાત્રધારિણે બ્રહ્મદત્તાય દેયં માસિકવેતનં ન દત્તમ્ । અતઃ બ્રહ્મદત્તઃ કુપિતઃ આસીત્ । સાયં નાટકે નાટ્યમાને વિષ્ણોઃ । પ્રત્યક્ષીકરણાઙ્કઃ પ્રચલન્નાસીત્ । બ્રહ્મદત્તેન, "બાલ, યદિ તવ વિષ્ણુઃ સર્વાન્તર્યામી ચેત્, સઃ અસ્મિન્ સ્તમ્ભેઽપ્યસ્તિ કિમ્?" ઇતિ રઙ્ગસ્ય વામસ્તમ્ભં દર્શયન્ ભણિતવ્યમાસીત્ । પ્રહ્લાદપાત્રધારિણા દેવદત્તેન, "નિસ્સંશયમ્, તાત" ઇતિ ભણિતવ્યમાસીત્ । તદા ઝટિતિ વામસ્તમ્ભાન્તર્હિતવિષ્ણોઃ પ્રાદુર્ભાવઃ ભાવ્યઃ આસીત્ । કુપિતઃ બ્રહ્મદત્તસ્તુ વામસ્તમ્ભસ્થલે દક્ષિણસ્તમ્ભં દર્શયન્, "બાલ, યદિ તવ વિષ્ણુઃ સર્વાન્તર્યામી ચેત્ સઃ અસ્મિન્ સ્તમ્ભેઽપ્યસ્તિ કિમ્"" ઇત્યપૃચ્છત્ । દિગ્ભ્રાન્તોઽપિ પ્રહ્લાદપાત્રધારી દેવદત્તઃ પ્રત્યુત્પન્નમતિઃ અવદત્, "તાત, વિષ્ણુઃ તસ્મિન્ સ્તમ્ભે નાસ્તિ । અસ્મિન્ સ્તમ્ભે અસ્તિ" ઇતિ વદન્ વામસ્તમ્ભમદર્શયત્ ।

## ૪૫. વાક્ચાતુર્યમ-૧૦

સુન્દરી કન્યા કાચન વસ્ત્રાપણં પ્રવિશ્ય કિઞ્ચન વસ્ત્રમવૃણોત્ યુવાનં વિક્રેતારમપૃચ્છત્, "દશમીટર્-મિતવસ્ત્રાય કતિ રૂપ્યકાણિ?"। યુવા સ્મિતવદનઃ અવદત્, "સુન્દરિ, એકેન ચુમ્બનેન પ્રતિ-મીટર્-વસ્ત્રં ક્રીણીયાત્ "ઇતિ । કન્યા ઈષદપિ ન પ્રક્ષુબ્ધા અવાદીત્, "બાઢમ્, દશમીટર્મિતં વસ્ત્રં દેહિ" ઇતિ । યુવા સોત્સાહં વસ્ત્રં મમૌ સાશંસઃ તસ્યાઃ હસ્તે ન્યક્ષિપચ્ચ । તદા સા કઞ્ચન વૃદ્ધં તસ્યાઃ નિકટે સ્થિતં દર્શયન્નવદત્, "અયં મમ પિતામહઃ તુભ્યં વસ્ત્રમૂલ્યં દદાતિ" ઇતિ ।

## ૪૬. દામ્પત્યમ્-૧૩

માતુલઃ । “વત્સ, અદ્ય ત્વમભિનન્દનીયઃ ખલુ । અદ્યૈવ તવ આનન્દદાયકદિવસેષુ મહત્તમઃ દિવસઃ ” ।
સ્વસ્રીયઃ । “આર્ય, મમ ઉદ્વાહઃ અદ્ય ન ભવતિ । શ્વઃ ખલુ ભવિતા ”
માતુલઃ :“જાનામિ, વત્સ, અત એવ બ્રવીમિ, “અદ્યૈવ તવ આનન્દદાયકદિવસેષુ મહત્તમઃ” ઇતિ । ”

## ૪૭. હાસ્યકૃચ્છ્રઃ-૨

વિમાનાનિ ઉડ્ડયનાત્ પ્રાક્ ઉડ્ડયનાવશ્યવેગં પ્રાપ્તું તદર્થરચિતમાર્ગે કતિચનનિમિષપર્યન્તં પ્રદ્રવન્તિ ખલુ । એકદા વિમાનમિત્થં પ્રદ્રાવ્ય એકઘણ્ઠાવેલામતિક્રમ્ય ભૂતલે એવ સ્થગિતઃ અભવત્ । તદનન્તરં વિમાનમુદડયત । વિમાનસ્થઃ યાત્રિકઃ ગગનસખીમપૃચ્છત્ । “કુતઃ વિમાનમિત્થં સ્થગિતમભવદિતિ । ગગબસખી પ્રત્યુવાચ, “ઉડ્ડયનપૂર્વધાવને વિમાનચાલકઃ વિમાનયન્ત્રે અસામાન્યશબ્દમશ્રૌષીત્ । અપરં વિમાનચાલકમાનેતું વિલમ્બઃ અભવત્” ઇતિ ।

## ૪૮. વાક્ચાતુર્યમ્-૧૧

કાચન સ્ત્રી શ્યામાનામ્ની ઉદરવેદનયા બાધિતા અન્યામપૃચ્છત્, “વૈદ્યં દ્રષ્ટુમિચ્છામિ । તવ પરિચિતઃ વૈદ્યઃ કોઽપ્યસ્તિ કિમ્?”। “અહં કઞ્ચન પ્રથિતં વૈદ્યં વેદ્મિ । પરન્તુ તસ્ય દર્શનશુલ્કમધિકં વર્તતે । પ્રથમદર્શને રૂપ્યકાણાં ત્રિશતં દેયમ્ । ઉત્તરદર્શનેષુ રૂપ્યકાણામ્ શતં દેયમ્,” ઇત્યવદત્ । શ્યામા તદ્વૈદ્યસ્ય વૈદ્યાગારમગાત્ । મિતવ્યયં કાઙ્ક્ષમાણા સ્વપ્રગલ્ભતાં પ્રયુયુજે, વૈદ્યમિત્થમવદચ્ચ, “આર્ય, અહં પુનરાગતાસ્મિ । ઉદરવેદના અદ્યાપિ બાધતે,” ઇતિ । વૈદ્યઃ પ્રગલ્ભતરઃ અવદત્, “ભવતિ, ભવતી ગતદર્શને દત્તં ભેષજમેવ પુનઃ ત્રિવાસરપર્યન્તં સેવતામ્” ઇતિ ।

## ૪૯. દામ્પત્યમ્-૧૫

કાચન કન્યા વૃત્તપત્રિકાયાં વિજ્ઞાપનામેકાં પ્રકાશિતવતી । “પતિમેકં વાઞ્છામિ” ઇતિ । અપરેદ્યુઃ શતાનિ પત્રાણિ તયા સ્વીકૃતાનિ । સર્વેષુ પત્રેષુ ઇદમેવ નિવેદિતમ્, “મમ પતિં સ્વીકુરુ” ।

## ૫૦. શિતબુદ્ધિઃ-૩

કદાચન કૃપણઃ વણિક્ બ્રહ્મગુપ્તઃ તસ્ય મિત્રાય ધનિકાય દેવવર્મણે રક્તં પ્રદાય મરણોન્મુખાય તસ્મૈ જીવદાનમકરોત્ । કૃતજ્ઞઃ દેવવર્મા અમૂલ્યં મર્સિડીસ્-કાર્-યાનમ્ ઉપાયનરૂપેણ બ્રહ્મગુપ્તાય દદૌ । બ્રહ્મગુપ્તઃ નિતરાં તુષ્ટઃ અભવત્ । પુનઃ દેવવર્મા રુગ્ણઃ અભવત્ । તસ્મૈ રક્તદાનમવશ્યમભવત્ । પુનરપિ બ્રહ્મગુપ્તઃ સહર્ષં મિત્રાય દેવવર્મણે રક્તં દદૌ । ઇદાનીં તુ દેવવર્મા મિત્રાય બ્રહ્મગુપ્તાય કિમપિ ઉપાયનં ન દદૌ । અતુષ્ટઃ બ્રહ્મગુપ્તઃ દેવવર્માણમવદત્,

“કથમિદમ્ । તદાનીમ્ તુ કાર્-યાનમુપાયનં અદદઃ । ઇદાનીં તુ કિમપિ ન દદાસિ?” । દેવવર્મા પ્રત્યવદત્, “ક્ષમસ્વ મામ્ । ઇદાનીં તુ મમ દેહે પ્રભૂતં તવ રક્તં પ્રવહતિ ખલુ” ।

## ૫૧. વાક્ચાતુર્યમ્-૧૧

ભાર્યા: યદ્યહં દિનપત્રિકા અભવિષ્યમ્ તદા સદા તવ હસ્તયોઃ અસ્થાસ્યમ્ ।

ભર્તા । નિસ્સંશયમ્ પ્રિયે, યદિ મમ ભાર્યા દિનપત્રિકા અભવિષ્યત્ તદા પ્રત્યહં સા નવા અભવિષ્યત્ ।

## ૫૨. વાર્ધક્યમ્-૧

કાચન વૃધ્દા બેઙ્ગલૂરુ નગરસ્ય રેલ્-નિઃસ્થાનસ્ય વેદિકાયાં સ્થિતા નિકટે સ્થિતં કઞ્ચન પુરુષમપૃચ્છત્ ।

વૃધ્દા: “ભોઃ, મૈસૂરુનગરં પ્રતિ રૈલ્-યાનં નિષ્ક્રાન્તં કિમ્?”

પુરુષઃ: “બાઢમ્” ।

વૃધ્દા: “શિમોગ્ગાનગરાત્ રૈલ્-યાનમાગતં કિમ્?”

પુરુષઃ:”બાઢમ્” ।

વૃધ્દા: “ચેન્નૈ નગરં પ્રતિ રૈલ્-યાનં નિષ્ક્રાન્તં કિમ્?

પુરુષઃ “માતઃ, અહં ન જાને । ત્વયા કુત્ર ગન્તવ્યમ્?”

વૃધ્દા: “પુત્ર, લોહપથં તર્તું વાઞ્છામિ । ”

## ૫૩. દામ્પત્યમ્-૧૬

કાચન સ્ત્રી વૈદ્યાલયં ગત્વા વૈદ્યં પૃચ્છતિ, “ભોઃ, કિમિદં કૃતં ભવતા? યદા ભવતા મમ ભર્તરિ શસ્ત્રચિકિત્સા કૃતા તદા પ્રભૃતિ સઃ મયિ ઔદાસીન્યં દર્શયતિ, વિરક્ત ઇવ ભાતિ । વિષણ્ણોઽહં ભૃશમ્” ઇતિ । વૈદ્યઃ પ્રતિવદતિ, “દેવિ, મયા કિઞ્ચિદપિ દુષ્કર્મ ન કૃતમ્ । સઃ ક્ષીણદૃષ્ટિરાસીત્ । તસ્ય દૃષ્ટિઃ યથા સામાન્યા ભવતિ તથા તસ્ય નયનયોઃ શસ્ત્રચિકિત્સા કૃતા ખલુ “ઇતિ ।

## ૫૪. હાસ્યકૃચ્છ્રઃ-૩

દ્વૌ નરૌ સ્વર્ગદ્વારે સમમિલતામ્ તથા મિથઃ સમભાષેતામ્ ।

પ્રથમઃ અવદત્, “તવ મરણં કથમભૂત્ ?”

દ્વિતીયઃ: “શૈત્યસાધને (refrigerator) મૃતઃ અભૂવમ્ । કથમભૂત્ તવ મરણમ્?”

પ્રથમઃ । “મમ પત્ની કેનાપિ પરપુરુષેણસહ રમતે ઇતિ સન્દિહ્ય અપરાહ્ણે તસ્યૈ પૂર્વસૂચનં ન દદન્ અહમ્ ઉદ્યોગાલયાત્ ગૃહં પ્રતિનિવૃત્તઃ । સા શય્યાગારે એકાકિની પ્રસાધને નિરતા મયા દૃષ્ટા । પ્રબલશઙ્કાબાધિતેન મયા મમ સૌધે । પ્રથમતલાત્ આચતુર્થતલં પ્રસભં સોપાનમારુહ્ય સર્વાસુ કક્ષ્યાસુ માર્ગણં કૃતમ્ । કુત્રાપિ ન કોઽપિ

મમ દૃષ્ટિપથં ગતઃ । નિતરાં ક્લાન્તઃ પઞ્ચમતલમારોઢું સોપાને પદં ન્યવિશમ્ । ઝટિતિ હૃદયવેદનયા મૃતોઽભૂવમ્ " ।

દ્વિતીયઃ "હન્ત ભોઃ! યદિ ભવાન્ પ્રથમતલે એવ નિવેશિતે શૈત્યસાધને અમૃગયિષ્યત તદા આવાં દ્વાવપિ જીવિતૌ અભવિષ્યાવ । "

## ૫૫. દામ્પત્યમ્-૧૭

કસ્યચિત્ નરસ્ય ભાર્યા મૃતા । મૃતાયાઃ શવં શવપેટિકાયાં વિનિવેશ્ય શવવાહકાઃ શવપેટિકાં શવાગારમાનયન્ । શવાગારે શવપેટિકા અકસ્માત્ શવાગારસ્ય ભિત્ત્યા વિઘટ્ટિતા । તદા પેટિકાયાઃ ક્ષીણકણ્ઠેન વ્યાહ્રિયમાણં કિમપિ ક્રન્દિતં શ્રુતમ્ । યદા શવવાહકૈઃ પેટિકાયાઃ પિધાનમપાવૃતમ્ તદા સા સ્ત્રી સજીવા ઇત્યવગતમ્ । તસ્યાઃ ભર્તા વિસ્મિતઃ કિઞ્ચિદ્ભીતશ્ચ તામુપચર્ય ગૃહમાનાયયત્ । સા તતઃ દશવર્ષાણિ જીવિત્વા કાલધર્મમગાત્ । પુનઃ મૃતાં તાં શવપેટિકાયાં વિનિવેશ્ય શવવાહકાઃ શવાગારમાનયન્ । તદા મૃતાયાઃ પતિઃ શવવાહકાનવદત્, "ભોઃ, શવાગારસ્ય અન્તઃ સાવધાનં ચલત । પેટિકા ભિત્ત્યા વિઘટ્ટેત"ઇતિ ।

## ૫૬. વાર્ધક્યમ્-૨

કશ્ચન વૃદ્ધઃ કશ્ચન યુવા ચ વિપણ્યાં પરસ્પરમકસ્માત્ સમઘટ્ટયેતામ્ । વૃદ્ધઃ અવદત્, "ક્ષમ્યતામ્ । ભવન્તમહં નાદર્શમ્ । મમ પત્ની અસ્મિન્ જનૌઘે મમ દૃષ્ટિપથાત્ લુપ્તા । તાં મૃગયામિ । "ઇતિ । યુવા પ્રત્યવદત્, "કિઞ્ચિત્કરમેતત્ । અહમપિ મમ ભાર્યાં મૃગયામિ । સા ચિરાય મમ દૃષ્ટિપથાત્ લુપ્તા ।" વૃદ્ધઃ અવદત્, "કિંરૂપા સા । તસ્યાઃ માર્ગણે અહં તવ સહાયઃ ભવેયમ્" ઇતિ । યુવા સગર્વં સદુઃખં ચ અવદત્, "સા વરારોહા કુમ્ભસ્તની પૃથુશ્રોણી કરતલોદરી ખલુ । ભવતઃ ભાર્યા કિંરૂપા?" ઇતિ । વૃદ્ધઃ પ્રત્યવદત્, "મમ ભાર્યાયાઃ વાર્તા તાવદસ્તુ, ભવતઃ ભાર્યામેવ વિચિનવાવ" ઇતિ ।

## ૫૭. હાસ્યકૃચ્છ્રઃ-૪

કશ્ચિત્ પુરુષઃ તમનુસૃત્ય ભષતઃ શુનકાત્ ભીતઃ ધાવતિ । શુનકસ્તુ ભષન્ તમભિધાવતિ ।

અન્ય એકઃ તં પુરુષં વદતિ, "રે, કુતઃ ભષતઃ શુનકાત્ ભીતઃ ધાવસિ? ન જાનાસિ કિમ્ યત્ ભષનશીલઃ શુનકઃ ન દશતિ, દશનશીલઃ શુનકઃ ન ભષતીતિ?" ઇતિ ।

પુરુષઃ પ્રત્યવદત્ "અહં ધ્રુવં જાનામિ । પરં તુ અયં શુનકઃ તમાભાણકં જાનાતિ વા ન વા ઇતિ સંશયગ્રસ્તઃ ધાવામિ" ઇતિ ।

## ૫૮. દામ્પત્યમ્-૧૮

પૃચ્છકઃ કોટ્યધીશ્વરં પૃચ્છતિ, "આર્ય, તવ કોટ્યધીશ્વરત્વસ્ય કિમ્ કારણમ્?"

કોટ્યધીશ્વરઃ, “મમ ધર્મપત્ની એવ કારણમ્”
પૃચ્છકઃ “તવ ધર્મપત્ની વનિતામણિઃ ખલુ । તવ વિવાહાત્ પૂર્વં ત્વં કિમભવઃ?”
કોટ્યધીશ્વરઃ, “અહં દશકોટ્યધીશ્વરઃ અભવમ્” ।

## ૫૯. શિતબુદ્ધિઃ-૪

ક્રૈસ્તપ્રાર્થનામન્દિરે રવિવાસરે પ્રાર્થનાનન્તરં મન્દિરસ્ય ધારણાર્થં ધનસઙ્ગ્રહણં કુર્વન્તિ । તદા વિપર્યસ્તશિરસ્ત્રાણમેકં એકસ્ય હસ્તાત્ અન્યસ્ય હસ્તં પ્રતિપાદયન્તિ । સર્વે યથાશક્તિ ધનં શિરસ્ત્રાણે નિવેશયન્તિ ।
એકસ્મિન્ પ્રાર્થનામન્દિરે પ્રાર્થનાનન્તરમર્ચકઃ શિરસ્ત્રાણં ધનસઙ્ગ્રહણાય ભક્તવૃન્દે નિહિતવાન્ । ત્રયઃ કૃપણાઃ વયસ્યાઃ ધનદાને અનિચ્છવઃ એકત્ર તત્ર આસન્ । યદા શિરસ્ત્રાણમપશ્યન્, તદા તેષ્વેકઃ મૂર્છિતવત્ સહસા ધ્રરાયામપતત્, અન્યૌ દ્વૌ પતિતં તં વહન્તૌ દ્રુતં મન્દિરાત્ બહિઃ અગચ્છતામ્ ।

## ૬૦. દામ્પત્યમ્-૧૯

ભાર્યા: કુતસ્ત્વં સર્વદા તવ હસ્તસ્યૂતે મમ ચિત્રં નિવેશ્ય ઉદ્યોગાલયં ગચ્છસિ?
ભર્તા: પ્રિયે, યદા ઉદ્યોગસ્થલે કૃચ્છ્રાણિ સમ્ભવન્તિ તદા ત્વદીયચિત્રાવલોકનેન તાનિ સુગમાનિ ભાસન્તે ।
ભાર્યા: અહો મમ અદ્ભુતશક્તિઃ ।
ભર્તા: [નીચસ્વરેણ] બાઢમ્, તવ ચિત્રં પશ્યન્ ચિન્તયામિ, “અસ્યાઃ કઠિનતરા બાધા કાસ્તિ?” ઇતિ ।

## ૬૧દામ્પત્યમ્-૨૦

પરસ્થલવાસી કશ્ચન ઉપાહારાલયં ગત્વા પરિચારિકામાહૂય તાં વદતિ, “ભોઃ, શ ृણુ, મહ્યં કવોષ્ણાં કાફ ीं, અર્ધપક્વમપૂપદ્વયં ચ કૃપયા આનય” ઇતિ ।
પરિચારિકા મનાક્ ચકિતાઽપિ ગ્રાહકસમીપ્સિતમાજ્ઞાં મન્યમાના તથૈવ કવોષ્ણાં કાફ ीમર્ધપક્વમપૂપદ્વયં ચ આનયતિ, ભોજનફલકસ્યોપરિ નિવેશયતિ ચ ।
તદા સઃ ગ્રાહકઃ તાં વદતિ, “બહુનિ દિનાન્યતીતાનિ મદ્ગૃહં ગત્વા । ગૃહોત્કણ્ઠા માં બાધતે । અત્ર આસને ઉપવિશ્ય માં યથામતિ મદ્ગૃહિણીવત્ ગર્હસ્વ“ઇતિ ।

## ૬૨. શિતબુદ્ધિઃ-૫

કૃપણ એકઃ સતતમ્ અર્જિતધને સ્તોકં ધનં વ્યયયિત્વા, કિઞ્ચિદ્ધનં ભાર્યાયૈ પ્રદાય શેષં ધનં એકસ્યાં પેટિકાયાં નિક્ષિપતિ સ્મ । અવસાનકાલે સન્નિહિતે ભાર્યામવદત્, “પ્રિયે, મમ ધનપ્રિયતા તવ જ્ઞાતા એવ । મયિ ઉપરતે મમ

સધનાં ધનપેટિકાં મયા સહ નિવેશ્ય ભૂગતાં કુરુ । "ભાર્યા અવદત્, "પ્રિય, નિસ્સંશયં તથૈવ કરોમિ, અલં ચિન્તયા" ઇતિ ।
કૃપણઃ અસૂનત્યજત્ । વિધેયા અપિ તુ સ્વાર્થપરા ભાર્યા તસ્ય ધનપેટિકાત્ ધનમાદાય બૈઙ્કે (bank) સ્વસઙ્ખ્યાને (account) ન્યસ્ય તદ્ધનસમાનમૌલ્યં ચૈકં (cheque) ભર્તૃનામ્નિ વિલિખ્ય તત્ ધનપેટિકાયાં ન્યક્ષિપત્ ભર્તુઃ શવેન સાકં ભૂગતમકરોચ્ચ ।

## ૬૩. વાર્ધક્યમ્-૪

વૃદ્ધદમ્પતી અન્યદમ્પત્યોઃ ગૃહે ભોજનં સ્વીકૃતવન્તૌ । ભોજનાનન્તરં પત્ની મહાનસં ગતે, પતી તુ ભોજનગૃહે એવ સંલપન્તૌ આસ્તામ્ ।
વૃદ્ધઃ ઇતરમવદત્, "હ્યઃ આવાં કાંશ્ચન ભોજનશાલાં ગતૌ યત્ર ભોજનં રસવત્તરમાસીત્ । "
ઇતરઃ અપૃચ્છત્, "તદ્ભોજનાલયસ્ય નામ કિમ્?"
વૃદ્ધઃ ચિરમચિન્તયત્, પરન્તુ તન્નામ સ્મૃતિપથં નાગચ્છત્ । તદા વૃદ્ધઃ ઇતરમપૃચ્છત્, "ભોઃ, તત્પુષ્પસ્ય નામ કિં યત્ શ્વેતવર્ણં મનોહરગન્ધિ નિદાઘકાલે ભૂરિ પ્રભવતિ ચ?"
ઇતરઃ અપૃચ્છત્, "મલ્લિકા ઇતિ નામ કિમ્?" ઇતિ ।
વૃદ્ધઃ પ્રત્યવદત્, "આમ્, તદેવ, ઉપકૃતોઽસ્મિ" ઇતિ ।
વૃદ્ધઃ તદા મહાનસદિશિ પશ્યન્ ઉચ્ચૈરવદત્, "મલ્લિકે, મલ્લિકે, તદ્ભોજનશાલાયાઃ નામ કિમ્, યત્ર આવાં હ્યઃ ભોજનમકુરુતામ્?" ઇતિ ।

## ૬૪. ઉદ્યોગિનઃ-૧

દ્વૌ સિહ્મૌ મૃગાલયે આસ્તામ્ । એકઃ મૃગાલયે જાતઃ અપરઃ વને જાતઃ । એકદા તૌ મૃગાલયાત્ પલાયિતૌ । મૃગાલયપાલાસ્તુ વનં ગતં વન્યસિહ્મં કતિપયદિવસેષ્વેવ પુનરપિ નિર્બધ્ય મૃગાલયમાનયન્ । મૃગાલયે જાતં નાગરસિહ્મં નગરં ગતમન્વિષ્ય ત્રિમાસાદૂર્ધ્વં મૃગાલયમાનીતવન્તઃ । દ્વૌ સિહ્મૌ પરસ્પરમભાષેતામ્ ।
વન્યસિહ્મઃ । ભોઃ વયસ્ય! ત્વમેતાવત્કાલં કુત્ર ગતઃ । વને પરિભ્રમન્તં માં લીલયા ન્યગૃહ્ણન્ ।
નાગરસિહ્મઃ । કિં વદામિ? અહં નગરે કસ્મિંશ્ચિત્સર્વકારકાર્યાલયે દિવસાનિ લેખ્યપત્રવૃન્દેષ્વન્તરિતઃ લીલયા અયાપયમ્ ।
વન્યસિહ્મઃ । ઉદરપોષણં તુ કથમભવત્?
નાગરસિહ્મઃ । પ્રત્યહં કાર્યાલયોદ્યોગિનમેકમખાદમ્ । ઉદ્યોગિનઃ સહસ્રશઃ સન્તિ ખલુ । એકઃ ન્યૂનઃ અભવત્ યદિ તત્ર કોઽપિ ન જાનાતિ ।
વન્યસિહ્મઃ । કથમિદાનીં બદ્ધઃ અભૂઃ ?
નાગરસિહ્મઃ । મયા પ્રમાદઃ આચરિતઃ ખલુ । હ્યઃ કાફ઼ીપરિવેષ્ટારં બાલમખાદમ્ । સપદ્યેવ તસ્ય અનુપસ્થિતિઃ સર્વૈઃ લક્ષિતા । સર્વે તસ્ય માર્ગણે પ્રવૃત્તાઃ અભવન્ । તદા લેખપત્રવૃન્દેષ્વન્તર્હિતં માં દૃષ્ટ્વા ભયાત્

પલાયિતવન્તઃ । મૃગાલયપાલાઃ આગત્ય માં પઞ્જરે બબન્ધુઃ ।

## ૬૫. દામ્પત્યમ્-૨૧

ચિરકાલાનન્તરં દ્વે વૃદ્ધે સખ્યૌ અમિલતામ્ । પરસ્પરકુશલાનન્તરં એકા અન્યામપૃચ્છત્ ।

એકા: "કચ્ચિત્ કુશલી તવ ભર્તા?"

અન્યા: "મમ દૌર્ભાગ્યાત્ સઃ દૈવાધીનઃ અભવત્ । "

એકા: "સુભૃશં ખિન્નાસ્મિ । કિમભવત્ ?"

અન્યા:" એકસ્મિન્ દિવસે તં શાકાય વૃન્તાકમાનેતું વિપણિં પ્રેષિતવતી । મધ્યેમાર્ગં સઃ હૃદયાઘાતાત્ મૃતઃ । "

એકા: "પશ્ચાત્ ત્વં કિમકરોઃ ?"

અન્યા: "કિં કરવાણિ? શાકાય ગૃહસ્ય શાકવાટિકાયામારોપિતં કૂષ્માણ્ડમેવ અપચમ્ । "

## ૬૬. હાસ્યકૃચ્છ્રઃ-૫

બ્રહ્મદત્તઃ મરણશય્યાયાં શયાનઃ આસીત્ । તસ્ય આપ્તવયસ્યઃ શમ્ભુઃ તં દ્રષ્ટું તત્ર આગતઃ । શમ્ભુઃ બ્રહ્મદત્તસ્ય શય્યાયાઃ નિકટે સ્થિત્વા બ્રહ્મદત્તમપશ્યત્ । બ્રહ્મદત્તઃ વક્તુમશક્તઃ સખેદં શમ્ભું હસ્તસંજ્ઞાભિઃ પત્રં લેખનીં ચ દાતું પ્રાર્થયત્ । શમ્ભુઃ તથૈવ અકરોત્ । યાવત્ બ્રહ્મદત્તઃ પત્રે કિમપિ અલિખત્ તાવદેવ સઃ અસૂનત્યજત્ । ખિન્નઃ શમ્ભુઃ તત્સમયે તત્પત્રપઠનં નોચિતમિતિ મત્વા કઞ્ચુકસ્યૂતે નિક્ષિપ્ય ગૃહં ગતઃ । ગૃહે પત્રં વ્યસ્મરત્ અતઃ નાપઠચ્ચ । અન્યેદ્યુઃ બ્રહ્મદત્તસ્મરણસભા આયોજિતા યત્ર શમ્ભુઃ બ્રહ્મદત્તસ્ય વિષયે કિમપિ ભાષિતું સર્વૈઃ પ્રાર્થિતઃ । યાવત્ ભાષિતું પ્રારબ્ધવાન્ તાવદેવ સઃ બ્રહ્મદત્તલિખિતં પત્રં સસ્માર યત્ દિષ્ટ્યા તસ્ય કઞ્ચુકસ્યૂતે એવ પિહિતમાસીત્ । સઃ ઉચ્ચૈરવદત્, "અયિ ભોઃ, મરણશય્યાયાં શયાનસ્ય બ્રહ્મદત્તસ્ય અન્તિમસન્દેશઃ અધુનૈવ મમ કઞ્ચુકસ્યૂતે વર્તતે । તં સન્દેશં સર્વે શ઼ૃણ્વન્તુ । "ઇતિ । પત્રમપાવૃત્ય પ્રથમં તત્ર લિખિતં સ્વગતમપઠત્, "રે મૂર્ખ । મમ શ્વાસાધારસ્ય આમ્લજનકનાલસ્યોપરિ સ્થિતોઽસિ" ।

## ૬૭. વાક્ચાતુર્યમ્-૧૩

પરિવ્રાજકવેષધરઃ કશ્ચન ભિક્ષાર્થં ગ્રામે અટતિ સ્મ । કોઽપિ તસ્મૈ ભિક્ષાં ન દદૌ । અન્તતઃ કસ્યાશ્ચિત્ ગૃહિણ્યાઃ ગૃહસ્ય પુરતઃ ગત્વા ભિક્ષાં યયાચે । ગૃહિણીમકથયચ્ચ, "ભવતિ! ભિક્ષાં દદાતુ । યદિ ભવતી ભિક્ષાં ન દદાતિ તદા યથાહં અન્યસ્મિન્ ગ્રામે સમાચરં તથૈવ અત્રાપિ સમાચરામિ । "તાપસઃ તપોબલેન માં શપેદિતિ ચિન્તયન્તી ગૃહિણી ભીતા તસ્મૈ ભિક્ષાં દદૌ । ભિક્ષાં દત્ત્વા તં પરિવ્રાજકમપૃચ્છત્, "ભગવન્! અન્યસ્મિન્ ગ્રામે ભવતા કિમાચરિતમ્?" । ભિક્ષામ્ કવલયન્ પરિવ્રાજકઃ અવદત્, "અયિ ભોઃ! નિરશનવ્રતં સમાચરમ્" ઇતિ ।

## ૬૮. વાક્ચાતુર્યમ્-૧૪

ક્રૈસ્તાલયપૂજકઃ અમ્રિયત, સ્વર્ગદ્વારે અન્યૈઃ મૃતૈઃ સાકં સ્વર્ગપ્રવેશાનુમત્યૈ પ્રતીક્ષતે સ્મ ચ । તસ્ય પુરતઃ આતપોપનેત્રે વર્ણરઞ્જિતવસ્ત્રે ચ ધારયમાણઃ કશ્ચન આર્યઃ અપિ પ્રતીક્ષતે સ્મ । સ્વર્ગદ્વારપાલકઃ તમાર્યમવદત્, "ભોઃ, કસ્ત્વમ્? કથય । તવ સ્વર્ગપ્રવેશયોગ્યતા અસ્તિ કિમિતિ પરીક્ષે "ઇતિ । સ આર્યઃ અવદત્, "અહં વિમાનચાલકઃ આસમ્ । કતિપયવર્ષેભ્યઃ પૂર્વમ્ ઉદ્યોગાત્ નિવૃત્તઃ અભવમ્ "ઇતિ । સ્વર્ગદ્વારપાલકઃ સ્મયમાનઃ તમવદત્, "સ્વાગતં ભોઃ, ઇમે કૌશેયવસ્ત્રે, ઇમં સૌવર્ણદણ્ડં ચ ગૃહાણ, સ્વર્ગે સુખમાસ્વ, " ઇતિ ।

અથ દ્વારપાલકઃ ક્રૈસ્તાલયપૂજકં તથૈવ અપૃચ્છત્ । ક્રૈસ્તાલયપૂજકઃ ગમ્ભીરસ્વરેણ અવદત્, "ભોઃ, અહં ત્રયસ્ત્રિંશત્ વર્ષાત્ લણ્ડન્-નગરે જેમ્સ્-ક્રૈસ્તાલયસ્ય પૂજકઃ આસમ્" ઇતિ । દ્વારપાલકઃ તમવદત્, "બાઢમ્, ઇમે કાર્પાસવસ્ત્રે ઇમં દારુદણ્ડં ચ ગૃહાણ । સ્વર્ગે સુખમાસ્વ "ઇતિ । ઈષત્કુપિતઃ ક્રૈસ્તાલયપૂજકઃ દ્વારપાલકમપૃચ્છત્, "અહો, કથમિત્થમ્? અસ્મૈ વિમાનચાલકાય સૌવર્ણદણ્ડં કૌશેયવસ્ત્રે ચ દત્તાનિ, મહ્યં પૂજકાય દારુદણ્ડં કાર્પાસવસ્ત્રે ચ દત્તાનિ । ઇદં ન્યાય્યં કિમ્?" । સ્મયમાનઃ દ્વારપાલકઃ અવોચત્, "યદા ત્વયા ક્રૈસ્તાલયે ધર્મોપદેશઃ કૃતઃ તદા સભ્યાઃ સર્વે અસ્વપન્, યદા સઃ વિમાનમચાલયત્ તદા વિમાનયાત્રિકાઃ સર્વે ઈશ્વરં પ્રાર્થયન્ત । અત એવ સઃ સ્વર્ગસુખાય યોગ્યતરઃ, " ઇતિ ।

## ૬૯. શિતબુદ્ધિઃ-૬

કુતૂહલી બાલઃ માતરમપૃચ્છત્, "અમ્બ, કુતસ્તવ કતિચનશિરોરુહાઃ પલિતાઃ?" ઇતિ । માતા અસ્મિન્ સમયે બાલાય સદ્વર્તનબોધનં કર્તું શક્યમિતિ મન્યમાના તમવદત્, "વત્સ, તવ એકૈકં દુર્વર્તનં મમ એકૈકં શિરોરુહં પલિતં કરોતિ" ઇતિ । મુગ્ધઃ બાલઃ સપદિ પ્રત્યવદત્, "અમ્બ, ઇદાનીમેવ જાનામિ "માતામહ્યાઃ સર્વે શિરોરુહાઃ કુતઃ પલિતા" ઇતિ" ઇતિ ।

## ૭૦. મૌઢ્યમ્-૪

કશ્ચન પુરુષઃ આરક્ષકમુપેત્ય અધ્યક્ષિપત્, "આર્ય, કષ્ટમાપતિતમ્ । મમ ગૃહાત્ ચોરાઃ સાક્ષાત્કરમ્ (T.V.) એકં વિહાય સર્વાણિ વસ્તૂન્યાદાય પલાયિતવન્તઃ "ઇતિ ।

આરક્ષકઃ અપૃચ્છત્, "આશ્ચર્યમ્ ખલુ । કુતઃ સાક્ષાત્કરમ્ આદાય ન ગતાઃ?" ।

પુરુષઃ પ્રત્યવદત્, "અહં સાક્ષાત્કરે ચલચિત્રં પ્રેક્ષમાણઃ આસમ્ ખલુ "ઇતિ ।

## ૭૧. હાસ્યકૃચ્છ્રઃ-૬

શર્વર્યાં ગાઢાન્ધકારે પર્જન્યઃ તડિત્સ્તનિતસહિતધારાસમ્પાતૈઃ વર્ષતિ સ્મ । બ્રહ્મદત્તઃ એકાકી વિજને રાજપથે ચલતિ સ્મ । "કિઞ્ચિત્ કાર્-યાનમાગચ્છેત્ યદિ ચાલકં પ્રાર્થયિત્વા કાર્-યાને ગચ્છેયમ્" ઇતિ ચિન્તયન્ જલસિક્તઃ તમસિ તડિત્જ્વલિતરાજપથે ન્યસ્તદૃષ્ટિઃ શનૈઃ પ્રાચલત્ । તદા કિમપિ યાનં શિરોદીપં વિના શનૈઃ આગચ્છદિવ

દૃષ્ટમ્ । કાર્-યાનસ્ય દ્વારમપાવૃતમાસીત્ । ઝટિતિ કાર્-યાનમારુહ્ય પૃષ્ઠપીઠે ઉપાવિશત્ । યદા સિક્તોત્તરીયં પરિત્યજ્ય સાવધાનં પરિતઃ તમસ્યેવ દૃષ્ટિમચાલયત્ તદા તસ્મૈ અવગતમભવત્ યત્ ચાર્-ચાલકસ્થાનમ્ રિક્તમાસીત્, કાર્-યાને અન્યઃ કોઽપિ નાસીત્, પરન્તુ કાર્-યાનં ચલન્નેવ આસીત્ । દિગ્ભ્રાન્તઃ ભયભીતશ્ચ અભવત્ । પર્જન્યે નિરન્તરં વર્ષતિ સતિ સઃ કુત્ર વા ગચ્છેત્ । પીઠે એવ નમિતસઙ્કુચિતાઙ્ગઃ ઈશ્વરં પ્રાર્થયન્ તસ્થૌ । સપદિ કાર્-યાનસ્ય વેગઃ વર્ધન્નિવ અભાત્ । રાજપથે દૃષ્ટિં ન્યદધાત્ । કસ્યાપિ હસ્તઃ યાનસ્ય માર્ગનિયન્ત્રણચક્રં ભ્રામયન્નિવ બભૌ । પૂર્વમેવ ભીતસ્ય બ્રહ્મદત્તસ્ય ભયં સીમાતીતમભવત્ । દૈવવશાત્ રાજપથપાર્શ્વે જ્વલન્ દીપઃ દૃષ્ટઃ । ઝટિતિ કાર્-યાનાદવાતરત્ । દીપઃ અનતિદૂરે સ્થિતસ્ય કસ્યચન ઉપાહારગૃહસ્ય આસીત્ । તં ગૃહં પ્રતિ દ્રુતં પ્રાચલત્ । અચિરેણૈવ ઉપાહારગૃહમવાપ ચ ।
ઉપાહારગૃહે પરિધાનશોષણં કૃત્વા ઉપાહારં ભક્ષયિતું પ્રારભત । તદા દ્વૌ બૃહત્કાયૌ સિક્તવસ્ત્રૌ પુરુષૌ તત્ર આગતૌ । તયોઃ એકઃ બ્રહ્મદત્તં ક્રૂરદૃષ્ટ્યા પશ્યન્ અન્યમવદત્, “રે, અયમેવ ધૂર્તઃ યઃ યદા આવાં અસ્મત્-કાર્-યાનસ્ય પૃષ્ઠે યાનં હસ્તાભ્યાં બલાત્ પ્રણુદન્તૌ આસ્વ તદા ઝટિતિ કાર્-યાને સમુપાવિશત્” ઇતિ ।

## ૭૨. બાલચેષ્ટા-૪

“કુતઃ રોદસિ, વત્સ?” માતા અપૃચ્છત્ । બાલકઃ પ્રત્યવદત્, “અમ્બ! પિતા ભિત્તૌ ચિત્રમ્ આલમ્બયિતુમ્ મુદ્ગરેણ કીલકં પ્રહરતિ સ્મ । તદા તસ્ય અઙ્ગુલી વ્રણિતા । અત એવ, “ ઇતિ રોદનનિરુદ્ધકણ્ઠઃ સગદ્ગદમવદત્ । માતા બાલકમાશ્વાસયન્તી પ્રત્યવદત્, “કિઞ્ચિત્કરં ખલુ તત્ । મા રુદઃ । ત્વયા હસિતવ્યમ્ આસીત્, “ ઇતિ । બાલકઃ ઉચ્ચૈઃ રુદન્ અવદત્, “અમ્બ! મયા હસિતમેવ, “ ઇતિ ।

## ૭૩. વાક્ચાતુર્યમ્-૧૫

કશ્ચન પૂજકઃ રાજપથે ચરન્ અન્યોન્યં વાગ્યુદ્ધં કુર્વતઃ કાંશ્ચન બાલકાનપશ્યત્ । બાલકાન્ વાગ્યુદ્ધાત્ વારયિતુમ્ તાનભિસસાર પપ્રચ્છ ચ, “બાલકાઃ, યૂયં કુતઃ ઇત્થં કલહં કુર્વન્તઃ સ્થ । કિં કારણમ્?” ઇતિ । તેષુ એકઃ પ્રત્યવદત્, “અયં સુન્દરઃ ગ્રામશુનકઃ સર્વત્ર અટતિ । વયં સર્વે તમ્ આબદ્ધ્ય ગૃહં નેતું વાઞ્છામઃ । અસ્માસુ એકેન એવ તં નેતું શક્યં ખલુ । અતઃ યઃ મૃષાવાદે અન્યાન્ જયતિ સ એવ શુનકં ગૃહં નયેત્ ઇતિ અસ્માભિઃ નિર્ણીતમ્ । ઇદાનીમસ્માસુ એકૈકઃ અન્યાન્ મૃષાવાદે જેતું યતતે” ઇતિ । પૂજકઃ ગમ્ભીરધ્વનિના અવદત્, “બાલકાઃ! મા એવમ્ । અનૃતં કદાપિ ન બ્રૂયાત્ । યદા અહં બાલઃ આસં તદા કદાપિ મયા અનૃતં નોક્તમ્” ઇતિ । ગતેષુ કેષુચિત્ ક્ષણેષુ, બાલકેષુ યવિષ્ઠઃ કશ્ચન તદા અવદત્, “એષ પૂજક એવ શુનકં નેતું યોગ્યઃ ઇતિ ભાતિ । સ એવ શુનકં નયતુ” ઇતિ ।

## ૭૪. વાક્ચાતુર્યમ્-૧૬

કદાચન કાચિત્ સ્ત્રી નદ્યાઃ તટે ભર્તુઃ જીર્ણકઞ્ચુકસ્ય નવીકરણે નિરતા આસીત્ । તદા અકસ્માત્ તસ્યાઃ હસ્તાત્ સૂચી નદ્યાઃ જલે ન્યપતત્ । તદા સા ઉચ્ચૈઃ રોદિતુમારબ્ધા, "મમ ભર્તા માં તાડયતિ યદ્યહં તસ્ય કઞ્ચુકં ન નવીકૃત્ય ગૃહં ગચ્છામિ ચેત્" ઇતિ । ઈશ્વરઃ તસ્યાઃ રોદનં શ્ૃણ્વન્ તત્ર આગત્ય તસ્યૈ જલાત્ એકાં સુવર્ણસૂચીં ઉદ્ધૃત્ય દદૌ । સા રુદન્તી એવ અવદત્, "સા સૂચી મમ ન ભવતિ" ઇતિ ।તદા ઈશ્વરઃ તસ્યૈ જલાત્ એકાં રજતસૂચીં ઉદ્ધૃત્ય દદૌ । તદાપિ સા અવદત્, "સા સૂચી મમ ન ભવતિ" ઇતિ । તદા ઈશ્વરઃ જલાત્ આયસસૂચીમ્ ઉદ્ધૃત્ય તસ્યૈ દદૌ । સા હૃષ્ટા અવદત્, "સા સૂચી એવ મમ" ઇતિ । તદા તુષ્ટઃ ઈશ્વરઃ તિસ્રઃ અપિ સૂચીઃ તસ્યૈ સત્યવચનાર્યૈ દદૌ । તદા સન્તુષ્ટા સા ઈશ્વરં સંસ્તુત્ય ગૃહં ગતા ।

અન્યેદ્યુઃ સા ભર્ત્રા સાકં નદીતટે ગચ્છતિ સ્મ । તસ્યાઃ ભર્તા પદસ્ખલનાત્ નદ્યાઃ જલે ન્યપતત્ । સા ઈશ્વરં પ્રાર્થયામાસ, "પરમેશ્વર, મમ પતિં દેહિ" ઇતિ । ઈશ્વરઃ તત્ર આગત્ય તસ્યૈ વિક્રમાદિત્યં જલાદુધૃત્ય "કિમયં તવ ભર્તા" ઇત્યપૃચ્છત્ । સા અવદત્, "બાઢં સ એવ મમ ભર્તા" ઇતિ । તદા કુપિતઃ ઈશ્વરઃ તામપૃચ્છત્, "કથમિદાનીમ્ અસત્યં વદસિ?" ઇતિ । "પ્રભો! શ્રુણુશ્વ, યદ્યહં, "અયં મમ પતિર્નભવતિ" ઇત્યવદિષ્યં તદા ત્વં ભોજરાજં મમ ભર્તારં ચ મહ્યમ્ અદાસ્યઃ । ઇદાનીં મમ સ્વાસ્થ્યં સમુચિતં ન ભવતિ । પતિત્રયપ્રીણને અશક્તા ખલુ । માં ક્ષમસ્વ "ઇતિ । કૃપાલુઃ ઈશ્વરઃ તસ્યાઃ અઙ્કે વિક્રમાદિત્યમેવ ન્યવેશયત્ ।

## ૭૫. વાક્ચાતુર્યમ્-૧૭

કશ્ચન યુવા કાર્યાલયે વિવર્ણવદનઃ ચિન્તામગ્નઃ આસીત્ । તસ્ય મિત્રં તમપૃચ્છત્, "ભોઃ, ચિન્તાક્રાન્તઃ અસિ ઇતિ મે ભાતિ । કિમાપન્નમ્?" ઇતિ ।

" કિં વદાનિ । શ્વઃ મમ શ્વશ્રુવઃ જન્મદિનમ્ । તદવસરે મયા તસ્યૈ કિઞ્ચિદુપાયનમ્ દેયમ્ । ઉચિતમુપાયનં કિમિતિ ચિન્તયામિ " ।

મિત્રં પ્રત્યવદત્, "ભણ, પરુત્ ત્વયા કિં દત્તમ્?"

"મયા તસ્યૈ બહુમૂલ્યં શ્મશાનસ્થલં ક્રીતમ્ "

મિત્રમ્ ઉચ્ચૈઃ હસતિ વદતિ ચ, "ત્વયા મહાર્ઘમ્ ઉપાયનમેવ દત્તમ્ । ઐષમઃ ત્વયા તસ્યૈ કિમપિ ન દેયં ખલુ।"

" કથમિત્થં વદસિ?"

"શ્રુણુ, શ્વઃ યદા ત્વં તયા સહ મિલસિ, સા ત્વાં પૃચ્છેત્ । "જામાતઃ, ઐષમઃ મહ્યં કિમુપાયનં પ્રયચ્છસિ " ઇતિ । તદા ત્વં સ્મિતવદનઃ ઇત્થં વદેઃ, "માતઃ, મયા પરુત્ દત્તમુપાયનં ત્વયા
અદ્યાપિ ન ઉપયુક્તં ખલુ । અતઃ ઐષમઃ કિઞ્ચિદપિ ન દદામિ" ઇતિ" ।

## ૭૬. બાલચેષ્ટા-૫

પિતા પુત્રં બાલં સ્વાપયિતું યતમાનઃ અસ્તિ । બાલં સ્વકોષ્ઠે તલ્પે શાયયિત્વા દ્વારં પિધાય બહિરાગચ્છતિ । કતિપય ક્ષણાદનન્તરમેવ બાલઃ ઉચ્ચૈઃ ક્રોશતિ, "તાત, અહં જલં પિપાસામિ । મહ્યં જલપૂર્ણં ચષકમાનય "ઇતિ ।

પિતા ઉચ્ચૈઃ પ્રતિવદતિ, “વત્સ, ઇદાનીં ત્વયા જલં ન પેયમ્ । તૂષ્ણીં સ્વપિહિ” ઇતિ । કતિપયક્ષણાદનન્તરં પુનઃ બાલઃ ઉચ્ચૈઃ વદતિ, “તાત, મહ્યં પિપાસા બાધતે । દ્રુતં જલમાનય “ઇતિ । ક્રુદ્ધઃ પિતા ઉચ્ચૈઃ પ્રતિવદતિ, “પશ્ય, અહં જલં ન આનયામિ, યદિ પુનઃ જલાર્થં ક્રોશસિ, તદા ત્વાં દણ્ડયામિ “ઇતિ । પુનઃ કતિપયનિમેષાદનન્તરં બાલઃ ઉચ્ચૈઃ વદતિ, “તાત, યદા ત્વં માં દણ્ડયિતું મમકોષ્ટમ્ આગમિષ્યસિ તદા મહ્યં જલમાનયેઃ” ઇતિ ।

## ૭૭. હાસ્યકૃચ્છ્રઃ-૭

કશ્ચન પણ્ડિતઃ વાગ્મી કદાચિત્ ગ્રામમેકમગચ્છત્ । યદા ગ્રામવાસિનઃ તસ્ય પાણ્ડિત્યં વાગ્મિતાં ચ અવગચ્છન્, તે તમવદન્, “પણ્ડિતવર્ય! અસ્માનુદ્દિશ્ય પ્રવચનં ભવાન્ કરોતુ” ઇતિ । પણ્ડિતઃ અનુમેને નિર્દિષ્ટ દિવસે વિર્દિષ્ટવેલાયાં પ્રવચનમારભત ચ । પ્રવચન વિષયઃ, “ભારવેઃ અર્થગૌરવમ્” ઇત્યાસીત્ । પણ્ડિતસ્ય નિરર્ગલવાગ્ધારાભિઃ ગ્રામીણાઃ સુસિક્તાઃ અભવન્ । પરં તુ પ્રવચને તે કિમપિ નાવગચ્છન્ । ગતેષુ કતિચનનિમિષેષુ કશ્ચન સભ્યઃ નિશ્શબ્દં સભાભવનાત્ બહિરગચ્છત્ । તં નિર્ગચ્છન્તં દૃષ્ટ્વા કતિચન અન્યેઽપિ સભામત્યજન્ । ઇત્થં અર્ધમુહૂર્તે ગતે, પણ્ડિતં વિહાય સભાયામેક એવ ગ્રામીણઃ આસીનઃ આસીત્ । પરિભૂતઃ પણ્ડિતઃ તમવદત્, “પ્રિય, ત્વમ્ એક એવ પ્રવચને આસક્તઃ ઇતિ ભાતિ” ઇતિ । સઃ ગ્રામીણઃ અવદત્, “આર્ય, યસ્યાં કુથાયાં ભવાન્ આસીનઃ સા મમ ભવતિ । પ્રવચનાન્તે સા મયા ગૃહં નીયતે । પ્રવચનાન્તં પ્રતીક્ષમાણઃ સ્થિતોઽસ્મિ” ઇતિ ।

## ૭૮. વાક્ચાતુર્યમ્-૧૮

મૃગરાજસ્ય વિવાહે મૂષિક આગત્યાભ્યનન્દતિત્થમ્ ।
“કેસરિ! તવ વિવાહેન તુષ્યેઽહં સુદિવસઃ પ્રાપ્તઃ” ॥

આખોર્ધાર્ષ્ટ્યં દૃષ્ટ્વા મૃગરાજાનુજોઽભર્ત્સયત કુપિતઃ ।
“રે રે મૂષિક! કથય ક્વ ત્વં ક્વ મૃગરાજો ભ્રાતા ॥ ”
મૂષિક અવદત્ સભયં । “ક્ષમસ્વ બન્ધો મમ ધાર્ષ્ટ્યં કૃપયા ।
અહમપ્યભવં સિંહઃ ત્વદગ્રજવદુપયમાત્ પૂર્વમ્ ”॥

## ૭૯. ઉદ્યોગિનઃ-૧

ત્રયઃ બાલકાઃ પરસ્પરં આત્મનઃ પિતૃણાં ધાવનરયવિષયે સગર્વં કત્થન્તે સ્મ ।
પ્રથમઃ । અયે, શૃણુતં, મમ પિતા ધનુર્ધારી । તેન ક્ષિપ્તઃ શરઃ યાવત્ લક્ષ્યં પ્રાપ્નોતિ તાવદેવ સ એવ દ્રુતં ધાવન્ લક્ષ્યં પ્રાપ્નોતિ ।
દ્વિતીયઃ । તદ્યત્કિઞ્ચિત્ ખલુ । શૃણુતં, મમ પિતા ગુલિકાસ્ત્રધારી । યાવત્ તેન ક્ષિપ્તા ગુલિકા લક્ષ્યં પ્રાપ્નોતિ તાવદેવ સ એવ દ્રુતં ધાવન્ લક્ષ્યં પ્રાપ્નોતિ ।

તૃતીયઃ । યુવાં કુતઃ કત્થેથે? શ‌ૃણુતમ્ । મમ પિતા સર્વકારાધિકારી ખલુ । તસ્ય રયઃ અમેયઃ । તસ્ય ઉદ્યોગાલયસ્ય પિધાનવેલા સાયં પઞ્ચવાદનસમયઃ । તથાપિ ઉદ્યોગાલયં રયાત્ નિષ્ક્રામન્ અસ્મદ્ગૃહં સાર્ધચતુર્વાદનસમય એવ ઉપૈતિ ।

## ૮૦. શિતબુદ્ધિઃ-૭

મિત્રે દેવદત્તબ્રહ્મદત્તૌ મિષ્ટાન્નવિપણિં કાઞ્ચન પ્રાવિશતામ્ । પશ્યતઃ દેવદત્તસ્ય બ્રહ્મદત્તઃ વિપણૌ ત્રીણિ ચાકોલેટભિધાનિ મિષ્ટાનિ ચોરયિત્વા તાનિ સ્વકઞ્ચુકસ્યૂતે ન્યવેશયત્ । વિપણી તચ્ચૌર્યં નાપશ્યત્ । બ્રહ્મદત્તઃ વિપણ્યાઃ બહિરાગત્ય દેવદત્તં સગર્વમવદત્, “પશ્ય, મમ સાહસમ્ । વિપણિના અદૃષ્ટ એવ સુકરમહમચૂચુરમ્” ઇતિ । દેવદત્તઃ તં “તવ સાહસાત્ ચતુરતરં સાહસં કરિષ્યામિ । પશ્યતો વિપણિનઃ મિષ્ટાનિ ચોરયિષ્યામિ । દ્રક્ષ્યસિ કિમ્? । આગચ્છ, વિપણિં પુનઃ પ્રવિશાવ” ઇત્યબ્રવીત્ । તૌ વિપણિં પ્રવિષ્ટૌ । દેવદત્તઃ વિપણિનમવદત્, “આર્ય, અનુમન્યસે ચેત્ તુભ્યં માયામેકાં દર્શયિતુમિચ્છામિ” ઇતિ । વિપણી અનુમેને । દેવદત્તઃ વિપણિનમવદત્, “મહ્યં ત્રીણિ ચાકોલેટ્-મિષ્ટાનિ દેહિ” ઇતિ । વિપણી તથૈવ અકરોત્ । દેવદત્તઃ તાનિ પ્રસભમખાદત્ । ક્રુદ્ધઃ વિપણી દેવદત્તમપૃચ્છત્, “તત્ર કા માયા?” । દેવદત્તઃ અવદત્, “ઇદાનીં બ્રહ્મદત્તસ્ય કઞ્ચુકસ્યૂતે પશ્ય । તત્ર ત્રીણ્યપિ ભવન્તિ” ઇતિ ।

## ૮૧. મૌઢ્યમ્-૫

કશ્ચન યુવા ભારતીયપ્રશાસનિકસેવાપરીક્ષાયાઃ વાચિકપક્ષે ભાગં વહતિ સ્મ ।સઃ કદા ભારતં સ્વાતન્ત્ર્યમલભત ઇતિ પૃષ્ટઃ ઉત્તરમદાત્, “કતિપયવર્ષેભ્યઃ પ્રાક્ પ્રારબ્ધઃસતતઃ પ્રયત્નઃ અન્તતઃ ક્રિસ્તશકે ૧૯૪૭ વર્ષે સફલઃ અભવત્” ઇતિ । અસ્મદ્સ્વતન્ત્રતાયાઃ કારણભૂતઃ કઃ ઇતિ પૃષ્ટઃ સઃ પ્રત્યવદત્, “બહવઃ કારણભૂતાઃ । યદ્યહં તેષ્વેકતમં આખ્યાસ્યામિ ચેત્ તદા અન્યે પરિભૂતાઃ ભવેયુઃ” ઇતિ । તદા કશ્ચિદુત્કોચગ્રહણં દેશે ઉલ્બણતમં સઙ્કટમિતિ પૃષ્ટઃ સઃ પ્રત્યુવાચ, “ઇદાનીં એતદ્વિષયે સંશોધનં ક્રિયમાણમ્ અસ્તિ । સંશોધનપરિણામાદનન્તરમેવ વક્તું શક્યમ્” ઇતિ । તુષ્ટાઃ પ્રાશ્નિકાઃ તમવદન્, “ભોઃ, અસ્મદ્પ્રશ્નાઃ ગોપ્યાઃ । અન્યેભ્યઃ ન વક્તવ્યાઃ । ગમ્યતામ્” ઇતિ ।
કોષ્ઠાત્બહિઃ યદા સ યુવા આગતઃ તદા અન્યે અર્થિનઃ તમપૃચ્છન્, “ભોઃ, બ્રૂહિ, કિં પૃષ્ટમ્?” । સઃ અવદત્, “પ્રશ્નાઃ ગોપ્યાઃ । વક્તું ન શક્નોમિ” ઇતિ । તેષુકશ્ચન ધર્મસિંહનામા તમવદત્, “પ્રશ્નાઃ ગોપ્યાઃ ભવેયુઃ । ઉત્તરાણિ ગોપ્યાનિ ન ભવન્તિ । તાનિ મે નિભૃતં બ્રૂહિ” ઇતિ । તદા સ યુવા આત્મના દત્તાનિ ઉત્તરાણિ તસ્મૈ સમાર્પયત્ । પ્રગલ્ભઃ ધર્મસિંહઃ તાન્યુત્તરાણિ કણ્ઠગતાન્યકરોત્ ।
યદા ધર્મસિંહઃ વાચિકપરીક્ષાર્થમ્ આહૂતઃ તદા આદૌ પ્રાશ્નિકેન સઃ પૃષ્ટઃ, “તવ જન્મ કદા અભવત્?” ઇતિ । સઃ પ્રત્યવદત્, “કતિપયવર્ષેભ્યઃ પ્રાક્ પ્રારબ્ધઃ સતતઃપ્રયત્નઃ અન્તતઃ ક્રિસ્તશકે ૧૯૪૭ વર્ષે સફલઃ અભવત્” ઇતિ । ઉત્તરેણ વિસ્મિતઃ તમપૃચ્છત્, “તવ પિતુર્નામ કિમ્?” ઇતિ । સઃ પ્રત્યવદત્, ““બહવઃ કારણભૂતાઃ । યદ્યહં તેષ્વેકતમમાખ્યાસ્યામિ ચેત્ તદા અન્યે પરિભૂતાઃ ભવેયુઃ” ઇતિ । રુષ્ટઃ પ્રાશ્નિકઃ અપૃચ્છત્, “ભ્રાન્તઃ અસિ કિમ્?” ઇતિ । સઃ વિનીતઃ પ્રત્યુવાચ

“ઇદાનીં એતદ્વિષયે સંશોધનં ક્રિયમાણમ્ અસ્તિ । સંશોધનપરિણામાદનન્તરમેવ વક્તું શક્યમ્” ઇતિ ।

## ૮૨. શિતબુદ્ધિઃ-૮

કદાચિત્ ન્યાયવાદી વૃદ્ધશ્ચ વિમાનયાને પરસ્પરપાર્શ્વપીઠયોઃ ઉપવિષ્ટૌ આસ્તામ્ । અધ્વા દીર્ઘ આસીત્ । કાલયાપનાય પરસ્પરં સમભાષેતામ્ ।સર્વજ્ઞંમન્યઃ ન્યાયવાદી વૃદ્ધં જડમતિમમનુત તમવદચ્ચ, “ભોઃ, કચ્ચિત્ કાલયાપનાય ક્રીડિતુમિચ્છસિ ?” ઇતિ । વૃદ્ધઃ અવદત્, “કા ક્રીડા?”

ન્યાયવાદી । પ્રશ્નમેકં પ્રક્ષ્યામિ । યદિ સદુત્તરં ન દાસ્યસિ તદા મહ્યં પઞ્ચાશત્રૂપ્યકાણિ દાસ્યસિ । તતઃ ત્વં માં પ્રશ્નમેકં પ્રક્ષ્યસિ । યદ્યહમ્ સદુત્તરં ન દાસ્યામિ તદા અહં તુભ્યં પઞ્ચશતં રૂપ્યકાણિ દાસ્યામિ । અવગચ્છસિ કિમ્? ક્રીડિતુમ્ અનુમનુષે કિમ્?”

વૃદ્ધઃ સુષુપ્સુરાસીત્ તથાપિ ક્રીડિતુમનુમેને । ન્યાયવાદી વૃદ્ધમપૃચ્છત્, “ચન્દ્રઃ ભૂમ્યાઃ કિયદ્દૂરે અસ્તિ?”। વૃદ્ધઃ, “ન જાને” ઇતિ વદન્ તસ્મૈ પઞ્ચાશત્રૂપ્યકાણિ દદૌ । વૃદ્ધઃ ન્યાયવાદિનમપૃચ્છત્, “આરોહણે દ્વિપાદ્ અવરોહણે તુ ત્રિપાદ્ કોઽયમ્?” । ન્યાયવાદી બહુકાલમચિન્તયત્ તથાપિ તસ્મૈ ઉત્તરં નાભાત્ તદા પરાજિતઃ વૃદ્ધાય પઞ્ચશતં રૂપ્યકાણિ દદૌ । વૃદ્ધઃ ધનં સ્વીકૃત્ય સ્વપ્તુમારભત । ન્યાયવાદી પરાભૂતઃ તં વૃદ્ધં પુનઃ અપૃચ્છત્, “તવ પ્રશ્નસ્ય ઉત્તરં કિમ્?” । વૃદ્ધઃ, “ન જાને” ઇતિ વદન્ ન્યાયવાદિને પઞ્ચાશત્રૂપ્યકાણિ દત્ત્વા સુખં સુષ્વાપ ।

## ૮૩. હાસ્યકૃચ્છ્રઃ-૮

ત્રયઃ પુરુષાઃ કસ્મિંશ્ચિત્ નિર્જને દ્વીપે નૌકાઘાતાત્ ક્ષિપ્તા અભવન્ । કિઙ્કર્તવ્યતામૂઢાઃ તે ઈશ્વરં પ્રાર્થયામાસુઃ । કાલે ગતે કશ્ચન દિવ્યરૂપધારી પુરુષઃ પ્રત્યક્ષઃ અભૂત્ । સઃ તાનવદત્, “ ભોઃ, ઈશ્વરેણ પ્રેષિતોઽહમ્ । પ્રીતોઽસ્મિ, એકૈકઃ એકં વરં વૃણીતામ્ “ઇતિ । પ્રથમઃ અવદત્, “દેવ, માં મદ્ગૃહં પ્રહિણોતુ” ઇતિ । તથૈવ અભવત્ । દ્વિતીયોઽપિ તથૈવ સ્વગૃહમગચ્છત્ । દેવેન પૃષ્ટઃ તૃતીયઃ સ્મિતવદનઃ અવદત્, “દેવ, અહમેકાકી અસ્મિ । અત્ર મમ મિત્રયોઃ પુનરાગમનં વાઞ્છામિ” ઇતિ । હન્ત! તે મિત્રે પુનરાગતે ।

## ૮૪. દામ્પત્યમ્-૨૨

સ્ત્રી પત્યા સહ કલહમકરોત્ । તદનુ સ્વમાતરં દૂરવાણ્યા અવદત્, “અમ્બ, પુનઃ મમ ભર્તા મયા સહ કલહમકરોત્ । તેન સહ જીવનં દુષ્કરમ્ । તવ ગૃહમાગમિષ્યામિ” ઇતિ । માતા અવદત્, “વત્સે, ત્વમત્ર આગમિષ્યસિ ચેત્ સઃ સુખી એવ ભવિષ્યતિ । તસ્ય અપરાધ: દણ્ડનીયઃ । અહમેવ તત્ર આગમિષ્યામિ । મમ ઉપસ્થિત્યા એવ તં દણ્ડયિષ્યસિ”

ઇતિ ।

## ૮૫. વાક્ચાતુર્યમ્-૧૯

ક્રિસ્તદેવાલયસ્ય અર્ચકઃ સાપ્તાહિકપ્રવચનાય દેવાલયે જનાન્ સમીક્ષતે સ્મ । ચિરાય એક એવ કર્ષકઃ આગતઃ । અર્ચકઃ તમપૃચ્છત્, “ભોઃ અદ્ય મમ પ્રવચનાય એક એવ આગતોઽસિ । કિમહં પ્રભાષૈ ઉત ન?” ઇતિ । કર્ષકઃ સપ્રશ્રયં પ્રત્યવદત્, “ભગવન્, ભવાન્ કિમિત્થં પૃચ્છતિ । કુક્કુટપરિવેષણસમયે યદિ એક એવ કુક્કુટઃ આગચ્છતિ તદા તસ્મૈ ખાદ્યં ન દેયં કિમ્?” ઇતિ । કર્ષકપ્રત્યુત્તરેણ વિસ્મિતઃ અર્ચકઃ તમવદત્, “ભોઃ, તવ વિવક્ષિતમવગતમ્ । અવહિતઃ શ ૃણુ” ઇત્યુક્ત્વા નિરર્ગલં સાર્ધઘટિકાપર્યન્તં બભાષે । અન્તે અર્ચકઃ કર્ષકમપૃચ્છત્, “ભોઃ, કચ્ચિન્મમ પ્રવચનં સમીચીનમ્?” ઇતિ । તદા કર્ષકઃ પ્રત્યવદત્, “ભગવન્, ખાદનસમયે યદિ એક એવ કુક્કુટઃ સમાગતઃ તદા સર્વં દ્રોણપ્રમાણં ખાદ્યં તસ્મૈ ન સમર્પયામિ ખલુ “ઇતિ ।

## ૮૬. હાસ્યકૃચ્છ્રઃ-૯

ભાર્યા: “પ્રિય! મમ કાર્-યાનસ્ય વાષ્પિન્ધનમિશ્રકે (carburetor) જલં પ્રવિષ્ટમ્ ઇતિ ભાતિ” ।

ભર્તા: પ્રિયે! કથમિદં સ્યાત્? તવ કાર્-યાનમ્ ઇદાનીં કુત્રાસ્તિ?

ભાર્યા: [સગદ્ગદમ્] અસ્મત્-પ્લવન-કાસારે (swimming pool)

## ૮૭. હાસ્યકૃચ્છ્રઃ-૧૦

એકદા સુહૃદૌ અમરસિંહધર્મસિંહૌ મૃગયાર્થં ગુલિકાસ્ત્રધારિણૌ વનમગચ્છતામ્ । મૃગયાપ્રસઙ્ગે ધર્મસિંહઃ ભલ્લૂકેન ભૃશં વ્રણિતઃ વિગતાસુરિવ જ્ઞાનશૂન્યઃ અભવત્ । અમરસિંહઃ સસાધ્વસં ચલદૂરભાષકેન નગરસ્થિતનગરભટાલયસ્ય સમ્પર્કમકરોત્ અવદચ્ચ, “ભોઃ! મયિ મમ સુહૃદિ ચ મૃગયાર્થં વને વિચરતોઃ મમ સુહૃદ્ ભલ્લૂકેન વ્રણિતઃ શેતે । સઃ ન પ્રતિભાષતે, ન જાને યદિ મૃતઃ ભવેત્ । ભવાન્ કૃપયા નિર્દિશતુ મયા કિં કરણીયમિતિ ”। નગરભટઃ પ્રત્યુવાચ, “ભોઃ! પ્રથમં તાવત્ ત્વયા દૃઢં જ્ઞાતવ્યમ્ યદિ તવ સુહૃત્ સજીવઃ મૃતો વા ઇતિ” । અમરસિંહઃ પ્રત્યવદત્, “ભોઃ! કતિપય ક્ષણાન્ તાવત્ નિરીક્ષતામ્ । વદામિ” ઇતિ । કતિપયક્ષણાનન્તરં નગરભટઃ દૂરવાણ્યાં ગુલિકાસ્ત્રપ્રયોગજનિતશબ્દમશ ૃણોત્ । સપદિ એવ અમરસિંહઃ દૂરવાણ્યામવદત્, “ભોઃ! ઇદાનીં મમ સુહૃત્ નિસ્સંશયં મૃતઃ” ઇતિ ।

## ૮૮. મદ્યપાનમ્-૩

ધર્મસિંહઃ કોલ્કતાનગરે કસ્મિંશ્ચિત્શુણ્ડાપાને મદિરાં પાતું પ્રતિસાયમાગચ્છતિ । મદિરાયાઃ કાચકૂપી(bottle)ત્રયં ક્રીણાતિ એકૈકં પિબતિ ચ । એકદા કુતૂહલાત્ શૌણ્ડિકઃ તમપૃચ્છત્, “આર્ય! કુતઃ એકકાલે એવ કાચકૂપીત્રયં ક્રીણાસિ? ઇતરે તુ એકાં કાચકૂપીં પીત્વા એવ અન્યાં ક્રીણન્તિ” ઇતિ । ધર્મસિંહઃ સ્મિતવદનઃ વ્યવૃણોત્, “ભોઃ! મમ ભ્રાતરૌ સ્તઃ । એકઃ દિલ્લીનગરે વસતિ, અન્યઃ મુમ્બયી નગરે । અસ્મિન્નેવ કાલે સાયં દ્વાવપિ તન્નગરસ્થશુણ્ડાપાને કાચકૂપીત્રયમિતાં મદિરાં ક્રીણીતઃ । પ્રથમા કાચકૂપી આત્મનઃ પાનાર્થમ્ । દ્વિતીયા તૃતીયા તુ ભ્રાત્રોઃ પાનાર્થમ્

। એકદેશે મિલિતુમશક્તાઃ એવં સંજ્ઞામકરવામ । યદા મદિરાં પિબામઃ એકસ્થલે એવ મદિરાં પિબન્તઃ ઇવ ભાવં વિન્દામઃ "ઇતિ । ધર્મસિંહસ્ય ઉત્તરાત્ તૃપ્તઃ શૌણ્ડિકઃ સ્વસ્થાનં પ્રતિ ન્યવર્તત । એવમેવ પ્રત્યહં ધર્મસિંહઃ સાયમાગચ્છતિ કાચકૂપીત્રયં ક્રીણાતિ, પિબતિ ચ । એકસ્મિન્ દિવસે ધર્મસિંહઃ કાચકૂપીદ્વયમેવ અક્રીણાત્ । શૌણ્ડિકઃ મનસિ અશઙ્કત, "અસ્ય ભ્રાત્રોઃ અન્યતરસ્ય દુરવસ્થા આપતિતા ભવેત્" ઇતિ । અપરેદ્યુઃ યદા ધર્મસિંહઃ આગત્ય કાચકૂપીદ્વયમક્રીણાત્, તદા શૌણ્ડિકઃ સવિનયં તમપૃચ્છત્, "અપિ તવ ભ્રાતરૌ કુશલૌ?" ઇતિ । ધર્મસિંહઃ સ્મયમાનઃ અવદત્, "નિસ્સંશયં, સખે!" ઇતિ । "કથં કાચકૂપીદ્વયમેવ ક્રીણાસિ?" ઇતિ । ધર્મસિંહઃ ગમ્ભીરસ્વરેણ અવદત્, "સખે! ઇદાનીમહં મદ્યપાનાત્ વિરતઃ । કાચકૂપીદ્વયં તુ મમ ભ્રાત્રોઃ એવ" ઇતિ ।

## ૮૯. વાક્ચાતુર્યમ્-૨૦

કાચન માન્યા સ્ત્રી ઔષધાપણિં ગતા । સા આપણિકમપૃચ્છત્, "ભોઃ! મયા સિયનૈડ્ વિષઃ ક્રયણીયઃ । અત્ર લભ્યતે કિમ્?" ઇતિ । ચકિતઃ આપણિકઃ તામપૃચ્છત્, "આર્યે, કિમર્થં વિષં ક્રીણાસિ?" ઇતિ । સા ગમ્ભીરસ્વરેણ તં પ્રત્યવદત્, "અહં મમ ભર્ત્રે વિષં દાતુમિચ્છામિ" ઇતિ । દિગ્ભ્રાન્તઃ આપણિકઃ અવદત્, "આર્યે! કિં વદસિ? યદિ તદર્થં તુભ્યં વિષં વિક્રીણૈ માં ત્વાં ચ આરક્ષકાઃ કારાગારં નયેયુઃ । ઇતઃ કૃપયા અપસર "ઇતિ । તદા સા આત્મનઃ વિત્તસ્યૂતાત્ છાયાચિત્રમેકમુદ્ધૃત્ય તસ્મૈ અદર્શયત્ યસ્મિન્ છાયાચિત્રે આપણિકસ્ય પત્ન્યા સહ તસ્યાઃ પતિઃ રતિક્રીડાયાં નિરતઃ આસીત્ । નિર્વર્ણઃ ઉદ્વિગ્નશ્ચ આપણિકઃ અવદત્, "અસંશયં તુભ્યં સિયનૈડ્ વિક્રીણે । ત્વયા પ્રથમમેવ વક્તવ્યમાસીત્ યત્ વૈદ્યનિર્દેશાત્ વિષં ક્રીણામિ" ઇતિ ।

## ૯૦. ન્યાયવાદી-૨

ન્યાયાલયે ન્યાયવાદી સાક્ષિસ્થાનસ્થિતં વૈદ્યં પરીક્ષતે ।

ન્યાયવાદી: વૈદ્યવર્ય! યદા ત્વયા કુણપપરીક્ષણાર્થં કર્તનં કૃતં તદા કર્તનાત્ પ્રાક્ ત્વયા નાડીપરીક્ષણં કૃતં કિમ્?

સાક્ષી: ન કૃતમ્ ।

ન્યાયવાદી: કચ્ચિત્ ત્વયા તસ્ય રક્તસંમર્દઃ પરીક્ષિતઃ?

સાક્ષી: ન પરીક્ષિતઃ ।

ન્યાયવાદી: તસ્ય શ્વસનં પરીક્ષિતં કિમ્?

સાક્ષી: સર્વથા ન ।

ન્યાયવાદી: અતઃ, કચ્ચિત્ મન્યસે ભાવ્યં યત્ સઃ તવ પરીક્ષણાત્ પૂર્વં જીવિતઃ આસીત્?

સાક્ષી: ન હિ ।

ન્યાયવાદી: કથં ત્વં નિસ્સંશયં મન્યસે?

સાક્ષી: યતઃ પરીક્ષણાત્ પૂર્વમેવ તસ્ય મસ્તિષ્કં મમ લેખનતલે (table) સ્થાપિતમાસીત્ ।

ન્યાયવાદી: તથાપિ ભાવ્યં ખલુ સઃ જીવિત એવ આસીત્?

સાક્ષી: [વિમૃશ્ય] યદિ તત્ ભાવ્યં સઃ કુત્રાપિ ન્યાયવાદી એવ ભવતિ ।

## ૯૧. હાસ્યકૃચ્છ્રઃ-૧૧

પત્રદૂતઃ (postman) કસ્યચિત્ જનસ્ય ગૃહં પ્રતિ પત્રવિતરણાય ગચ્છતિ યદા સઃ બૃહત્સારમેયેન સહ સ્થિતં કઞ્ચન બાલકં પશ્યતિ । સઃ સારમેયાત્ ભીતઃ તં બાલકં પૃચ્છતિ, "બાલ! કચ્ચિત્ તવ સારમેયઃ દશતિ?" ઇતિ । બાલકઃ પ્રતિવદતિ, "મમ સારમેયઃ કદાપિ કમપિ ન દશતિ" ઇતિ । યાવત્ ભયમુક્તઃ પત્રદૂતઃ પુરતઃ ગચ્છતિ તાવદેવ સ સારમેયઃ તં દશતિ । દંશબાધિતઃ પત્રદૂતઃ રુષ્ટઃ બાલં પૃચ્છતિ, "રે! કુતઃ અનૃતં વદસિ । ત્વાં તાડયામિ" ઇતિ । બાલકઃ પ્રતિવદતિ, "અહમનૃતં ન વદામિ । અયં સારમેયઃ મમ ન ભવતિ ખલુ, " ઇતિ ।

## ૯૨. હાસ્યકૃચ્છ્રઃ-૧૨

હરિદત્તઃ ધર્મદત્તઃ સઞ્જયદત્તશ્ચ વયસ્યાઃ આસન્ । ત્રયોઽપિ એકકાલે એવ સ્વર્ગમગચ્છન્ । તત્ર ચિત્રગુપ્તઃ તાનવદત્, "ભોઃ! શ ૃણુત, પૃષ્ટપ્રશ્નસ્ય સત્યમેવ ઉત્તરં પ્રદેયમ્ । યદિ કોઽપિ અસત્યં વદેત્ તર્હિ સઃ સ્વર્ગાત્ બહિષ્ક્રિયતે "ઇતિ । અથ । સઃ હરિદત્તમપૃચ્છત્, "કચ્ચિત્ ભૂલોકે પરદારરતઃ અભવઃ?" "કદાપિ ન પ્રભો" ઇત્યવદત્ હરિદત્તઃ । "બાઢમ્, ઇમાનિ કૌશેયવસ્ત્રાણિ પરિધાય સ્વર્ગસુખમનુભવ" ઇતિ । હરિદત્તઃ તુષ્ટઃ કૌશેયવસ્ત્રાણિ પરિજગ્રાહ । ચિત્રગુપ્તઃ ધર્મદત્તમપિ તથૈવ અપૃચ્છત્ । "કદા કદા પરદારરક્તઃ અભવમ્ ।પરન્તુ પશ્ચાત્ તપ્તઃ સ્વદારાસ્વેવ રતઃ અભવમ્"ઇતિ । ચિત્રદત્તઃ તસ્મૈ કાર્પાસવસ્ત્રાણિ દદૌ । ચિત્રગુપ્તેન તથૈવ પૃષ્ટઃ સઞ્જયદત્તઃ ઉત્તરમદાત્, "ક્ષમસ્વ મામ્ । અહં સદા પરદારાસ્વેવ રતઃ અભવમ્" ઇતિ । તસ્મૈ ચિત્રગુપ્તઃ વલ્કલાનિ દદૌ । કાલે ગતે એકદા સઞ્જયદત્તઃ હરિદત્તેન સહ સમમિલત્ । તદા દુઃખસાગરે નિમગ્નં હરિદત્તં સઞ્જયદત્તઃ અપૃચ્છત્, "મિત્ર! કિમિદમ્? કુતઃ દુઃખમગ્નઃ અસિ?" ઇતિ । "હ્યઃ વલ્કલવસ્ત્રધારિણીં મમ ભાર્યામત્ર અપશ્યમ્ " ઇતિ નિર્વિણ્ણઃ હરિદત્તઃ અવદત્ ।

## ૯૩. દામ્પત્યમ્-૨૨

પતિઃ પત્નીં વદતિ, "પ્રિયે! અહં મમમિત્રમેકમ્ અદ્યરાત્રૌ ભોજનાય આહ્વયમ્" ઇતિ ।
પત્ની વદતિ, "અરે, કિમિદમ્? મત્તોઽસિ કિમ્? ગૃહમવ્યવસ્થિતં વર્તતે । વસ્ત્રાણિ ક્રેતુમાપણં જિગમિષામિ । અદ્ય ભક્ષ્યભોજ્યયુતભોજનપાકે મમ આસ્થા નાસ્તિ । "
પતિઃ, "અહં સર્વં જાનામિ" ।
પત્ની । "અથ કુતઃ મિત્રમ્ આહ્વયઃ?"
પતિઃ, "મુગ્ધઃ સઃ પરિણેતું વાઞ્છતિ" ।

## ૯૪. વાક્ચાતુર્યમ્-૨૧

ભર્તાઃ પ્રિયે, યદિ મહ્યં પ્રભૂતં સ્વં મમ પિતા ન અદાસ્યત્ ત્વં માં અવરિષ્યઃ કિમ્?
ભાર્યાઃ પ્રિય, યદિ ન કેવલં તવ પિતા અન્યઃ કોઽપિ તુભ્યં પ્રભૂતં સ્વમ્ અદાસ્યત્, તદાપિ અહં ત્વામ્ અવરિષ્યમ્ ।

## ૯૫. ન્યાયવાદી-૨

ન્યાયવાદી: ઇદાનીં વયમભિયોગે જિતવન્તઃ ખલુ । કચ્ચિદ્વદસિ યદિ ત્વયા ચૌર્યં કૃતમ્?
અભિયુક્તઃ: હ્યઃ ન્યાયાલયે ભવતઃ વાદસરણીં શ્રુત્વા શઙ્કિતોઽહં યદિ મયા ચૌર્યં કૃતં વા ન વા ।

## ૯૬. શિતબુદ્ધિઃ-૯

કાચન કાર્-યાનચાલિકા રાજપથે આરક્ષકેણ અવરુદ્ધા । અવરોધકારણં પૃષ્ટઃ આરક્ષકઃ પ્રત્યવદત્, "આર્યે! અનુજ્ઞાતવેગમતિક્રમ્ય વાહનં ત્વયા ચાલિતમ્ । કૃપયા દર્શય તવ ચાલનાનુજ્ઞાપત્રમ્ । સ્ત્રી પ્રત્યવદત્, "આર્ય! મમ અનુજ્ઞાપત્રં નાસ્તિ । ત્રિવારં મદિરાપાનમત્તા કાર્-યાનચાલનમકરવમિતિ કારણાત્ આરક્ષકૈઃ તત્ સ્વાયત્તીકૃતમ્"। ચકિતઃ આરક્ષકઃ અપૃચ્છત્, "આર્યે! કૃપયા વાહનસ્ય પઞ્જીસઙ્ખ્યાપત્રં દર્શય" ઇતિ । સ્ત્રી પ્રત્યવદત્, "તન્નાસ્તિ, અહં ઇમં કારયાનમપાહરમ્ " ।
આરક્ષકઃ, "અપાહરઃ?"
સ્ત્રી, "બાઢમ્, ન કેવલં કાર્-યાનમપાહરં, તસ્ય સ્વામિનં હત્વા તસ્ય કાયં ખણ્ડશઃ નિકર્ત્ય કાર્-યાનસ્ય સામગ્રીકોષ્ઠે ન્યવેશયમ્"
આરક્ષકઃ નિતરાં ભ્રાન્તઃ સ્વનિયામકેન સહ દૂરવાણ્યા સમલપત્ સાહાય્યં પ્રાર્થયચ્ચ । ક્ષણાત્ નિયામકઃ કતિચન આરક્ષકૈઃ સહ તત્ર વાહને આગચ્છત્ । તાં સ્ત્રિયં સ્વગુલિકાસ્ત્રસ્ય લક્ષ્યં કૃત્વા અવદત્, "કૃપયા યાનાદવાતર"। સ્ત્રી અવાતરત્ અપૃચ્છચ્ચ, "આર્ય, કિમાપતિતમ્?" નિયામકઃ, " આર્યે! મમ આરક્ષકઃ વદતિ, "ત્વં, કાર્-યાનમપહૃત્ય તસ્ય સ્વામિનમહન્" ઇતિ । દિગ્ભ્રાન્તા ઇવ સ્ત્રી અવદત્, "કિં?કિં? અહમહનમ્? "ઇતિ । નિયામકઃ અવદત્, "કાર્-યાનસ્ય સામગ્રીકોષ્ઠમ્ અપાવૃણુ" ઇતિ । સ્ત્રી સામગ્રી-કોષ્ઠમ્ અપાવૃણોત્ । સામગ્રી કોષ્ઠે ન કિઞ્ચિદપિ વસ્તુ અવર્તત ।
નિયામકઃ, "કચ્ચિદિદં તવ યાનમ્?"
સ્ત્રી, "આર્ય! નિઃસંશયમ્" ।
"તર્હિ તવ યાનસ્ય પઞ્જીસઙ્ખ્યાપત્રં દર્શય" ।
"પશ્ય, ઇદં પત્રમ્" ઇતિ વદન્તી પઞ્જીસઙ્ખ્યાપત્રમદર્શયત્ ।
"તવ ચાલનાનુજ્ઞાપત્રં દર્શય" ।
હસ્તસ્યૂતાત્ અનુજ્ઞાપત્રમુદ્ધૃત્ય સ્ત્રી અદર્શયત્ ।
નિયામકઃ ઉદ્ભ્રાન્તઃ તામવદત્, "આર્યે! ક્ષમસ્વ મામ્ । આરક્ષકઃ મામવાદીત્ ત્વં કારયાનમપહૃત્ય, કાર્-યાનસ્વામિનં હત્વા, તસ્ય કલેવરં નિકર્ત્ય યાનસ્ય સામગ્રી-કોષ્ઠે ન્યવેશયઃ । ત્વયા સાકં ન કાર્-યાનપઞ્જીસઙ્ખ્યાપત્રં ન ચ તવ ચાલનાનુજ્ઞાપત્રં વર્તેતે ઇતિ । "
સ્ત્રી, "અહો! અનૃતસ્ય પરાકાષ્ઠા ખલુ । સ ચ પ્રાયેણ અવાદીત્ યદહં અનુજ્ઞાતવેગમતિક્રમ્ય કાર્-યાનચાલનમકાર્ષં ચ?"

## ૯૭. વાક્ચાતુર્યમ્-૨૨

વૈદ્યઃ ચિકિત્સાં લબ્ધવતા કેનચન સહ દૂરવાણ્યાં સમલપત્, “ભોઃ, ત્વયા દત્તં વિત્તકોષપત્રં(cheque) પુનરાગતમ્ ખલુ” ઇતિ ।
ચિકિત્સિતઃ પ્રત્યવદત્, “ક્ષમ્યતાં, મમ જાનુવેદના ચ પુનરાયાતા” ઇતિ ।

## ૯૮. વાક્ચાતુર્યમ્-૨૩

કાર્-યાને ઉદ્યોગાલયં ગચ્છન્ નર એકઃ સ્વોદ્યોગાલયસ્ય નિકટે કાર્-યાનસંસ્થાપનાય સ્થલમ્ માર્ગયતિ સ્મ । કુત્રાપિ અવકાશઃ ન દૃષ્ટઃ । સ્વકાર્યાય ત્વરિતં ગન્તુકામઃ ઈશ્વરં યાવત્ પ્રાર્થયત્, “પ્રભો! ત્વત્કૃપયા યદિ કાર્-સંસ્થાપનાય અવકાશઃ લભ્યતે ચેત્ અદ્ય પ્રભૃતિ ધૂમપાનં ન કરિષ્યામિ” ઇતિ તાવદેવ અવકાશઃ દૃષ્ટઃ । ઝટિતિ ઈશ્વરમવદત્, “વિસ્મર યદુક્તમ્ પ્રભો । ઇદાનીમેવ અવકાશઃ લબ્ધઃ” ઇતિ ।

## ૯૯. દામ્પત્યમ્-૨૩

પરિચારિકા વેતનવૃદ્ધિમ્ અવાઞ્છત્ । સા તસ્યાઃ સ્વામિનીં પ્રાર્થયત, “ભવતિ, અહં મમ માસિકવેતને વૃદ્ધિં કાઙ્ક્ષામિ” ।
સ્વામિની સગર્વમપૃચ્છત્, “વૃદ્ધિઃ કુતઃ?” ।
પરિચારિકા પ્રત્યવદત્, “ભવતિ, ત્રીણિ કારણાનિ ભવન્તિ । અહં વસ્ત્રધાવને ભવત્યાઃ ચતુરતરા” ।
સ્વામિની રુષ્ટા અપૃચ્છત્, “કો વદતિ ત્વં ચતુરતરા ઇતિ?” ।
પરિચારિકાઃ “ભવત્યાઃ ભર્તા । કિઞ્ચ અહં પાકકલાયામપિ ભવત્યાઃ ચતુરતરા” ।
સ્વામિનીઃ “મૃષા ખલુ । કો વદતિ ઇત્થમ્?”
પરિચારિકાઃ “ભવતિ! ભવત્યાઃ ભર્તા એવ । અપિ ચ અહં ભવત્યાઃ કામકલાયામપિ ચતુરતરા ।”
સ્વામિની [સરોષમ્] “હઞ્જે! પુનઃ મમ ભર્તા અવદત્ કિમ્?”
પરિચારિકાઃ “નહિ, નહિ, ભવત્યાઃ નિષ્કુટપાલકઃ અવદત્”
સ્વામિની ચકિતા નિર્વાક્યા અભવત્ । સાવધાનં પરિચારિકામ્ અપૃચ્છત્, “ભગિનિ! કિયતીં વેતનવૃદ્ધિમપેક્ષસે?”

## ૧૦૦. શિતબુદ્ધિઃ-૧૦

સહોદરી સહોદરં પૃચ્છતિઃ ભ્રાતઃ, પિતામહ્યૈ તસ્યાઃ જન્મદિને કિમ્ ઉપાયનં દાતુમ્ ઇચ્છસિ?
સહોદરઃઃ અહં તસ્યૈ પાદકન્દુકં દાસ્યામિ ।
સહોદરીઃ વ્યર્થઃ ખલુ । સા પાદકન્દુકેન કિં વા કરિષ્યતિ?
સહોદરઃઃ યતઃ, સા મમ જન્મદિને મહ્યં ભગવદ્ગીતામ્ અદાત્ ખલુ ।

-ઇતિ શમ્-

Compiled/written, encoded, and proofread by
G.S.S. Murthy murthygss at gmail dot com

*Hasyashikarashatakam*
pdf was typeset on July 7, 2024

Please send corrections to *sanskrit@cheerful.com*